श्रीगणेशायनमः ॥ प्रयोगमिच्छताज्ञातुंज्ञेयंकारकमादितः ॥ संख्याषड्वि
धंभेदात्त्रयोविंशतिधापुनः ॥१॥ तत्रपंचविधःकर्त्ताकर्मसप्तविधंभवेत् ॥
करणंद्विविधंचैवसंप्रदानंत्रिधामतं ॥२॥ आपादानंद्विधाचैवतथा
धारश्चतुर्विधः ॥ करोतिकारकंसर्वंतस्मात्तंप्रविवक्ष्यया ॥३॥ तत्रक
र्त्र्यभिहितेप्रथमैवाविधीयते ॥ तृतीयावाथवाषष्ठीस्मृतानभिहिते
द्विधा ॥४॥ तथाकर्मण्यभिहितेविभक्तिंविद्धिपूर्विकां ॥ अनुक्तेप्रथ
मांहित्वापंचमींसप्तमींतथा ॥५॥ तृतीयापंचमीचैवषष्ठीचकरणे

त्रिधा ॥ षष्ठी चतुर्थी तृतीया संप्रदाने यथा त्रिधा ॥६॥ पंचमी स्वल्पप्रदाने चर्तते न ततो न्यथा ॥ सप्तम्येवाधिकरणे कारकस्यैष संग्रहः ॥७॥
समासस्तद्धितस्तिङ्कृत्तेच चत्वारो भिधायकाः ॥ त एवानामि संबंधे भवंत्य
नभिधायकाः ॥८॥ षोढा समास संक्षेपादष्टाविंशतिधा पुनः ॥ नित्या
नित्यत्वयोगेन लुगलुक्चेन च द्विधा ॥९॥ तत्राष्टधा तत्पुरुषः सप्तधा कर्मधार
यः ॥ पंचधा बहुव्रीहिर्हि द्विगुरा भाषितो द्विधा ॥१०॥ द्वंद्वश्च तुर्विधा इत्ये
2 व्ययीभावो द्विधा मतः ॥ तेषां पुनः समासानां प्राधान्यं तु चतुर्विधं ॥११॥

सामान्याव्ययभावोख्यस्त्रिविधस्तद्धितोमतः॥पदानांतुसमर्थानांप्रथमैव
प्रसूयते॥१२॥तिङंचनवपूर्वार्धेत्वादेशाचपरोद्विधा॥परस्मैपदमाख्यातं
तङानावात्मनेपदं॥१३॥परस्मात्मनेभागवचनानित्रिधात्रिधा॥त्रयस्तु
पुरुषाश्चाप्रथममध्यमोत्तमौः॥१४॥एकद्विबहुसंख्यानिपदान्येकैकशस्ति
ङां॥परस्मैकर्त्तरिस्थेयंनभावेनापिकर्मणि॥१५॥आत्मनेत्रिषुविज्ञेयंभावे
कर्त्तरिकर्मणि॥धातोरकर्मकात्भावेप्रथमैकवचनंततः॥१६॥सकर्माकर्म थां
काद्धातोःकर्त्तरिस्मृतमात्मने॥यत्कर्मणितुनिर्दिष्टंवर्त्ततेतत्सकर्मकात्॥१७॥
नाम्नैवसन्निधौयात्र्व्यःप्रथमःपुरुषोभवेत्॥युष्मद्युप्यमिसमस्त्रिभिरेवतुमध्यमः॥

को

अस्माबांवयंतेभिरुत्तमो नान्यथामतः ॥ अन्यत्रचप्रहासेस्याद्यथामन्येतुभो
क्षसे ॥१९॥ एतस्मिन्नपिवर्त्तंतेभावेकर्त्तरिकर्मणि ॥ अजप्युद्धिनूयमोभावे
श पुंजकाराउ एवच ॥२०॥ सकर्मकाकर्म[illegible]द्धातोर्भवेत्कर्मभावयोः ॥ कृत्याश्चै
वत्तलर्थाः। प्रत्ययोरेवानुवर्णिताः ॥२१॥ त्रिषुगत्यर्थकादिकेभ्यस्तथाचैवादि
कर्मणि ॥ अकर्मकात्समुत्पन्नोवर्त्ततेकर्त्तृभावयोः ॥२२॥ इष्णुचालुकचतुवि
चू चत्नूर्णौ क्विपूक्वरैभौल्युणिञ् ॥ उकाणुकौ ष्ट[illegible] कूटकादय[illegible] कर्त्तरि ॥२३॥
पू भोक्त्वान्तरकालेतु त्यप्तु मुनक्त्वा पूर्वकालजाः ॥ कर्मणि प्रथमा तेषां द्वितीयात्वविव
क्षापतः ॥२४॥ वर्त्तमानेतुनिर्द्दिश्यतेन्निशानच्शानसौ ॥ द्रव्यसत्तापरत्वाभ्यांसमासो
शे व कन्तु न्य तु म् चस्मृताः

इतिवररुचिप्रयोगसंग्रहे ॥ ग्रंथानामर्थविनाहं श्लोकानां पंचविंशतिः ॥ प
रार्थभावेनियोटं प्रभवेयंभवेभवे ॥ २६ ॥ इतिवररुचेविवेकसंग्रहेपंचविंश
तिश्लोकमथमपटलः ॥ योयथाविहितंशब्दप्रयोगं ज्ञातुमिच्छति ॥ तेना
दितः कारकंज्ञेयमिति ॥ तच्चकारकं संज्ञयाषड्विधं ॥ कथं कर्तृकर्मकरणसं
पारदाना प्रदानापादानाधिकरणमिति ॥ तद्भेदाः पुनः त्रयोविंशतिधाभवंति ॥ कथं पंचविधः क
र्ता ॥ सप्तविधंकर्म ॥ द्विविधंकरणं ॥ त्रिविधंसंप्रदानं ॥ द्विविधमपादानं ॥ चतुर्विध
मधिकरणंचेति ॥ तत्रपंचधोदितंकर्ता ॥ यथा ॥ स्वतंत्रः कर्ता ॥ हेतुकर्ता ॥ कर्मकर्ता ॥ अ
भिहितकर्ता ॥ अनभिहितकर्ताचेति ॥ तत्रस्वतंत्रः कर्ता ॥ यथा ॥ पुण्यंकरोतिसाधुः ॥

...यां वा सस्यात्...विवक्षितो
यः कर्ता स्यात्

मैत्रीं भजंते। संतो गुणानाप्नुवंति अकुत्सितशीलाः। रेचकत्वः कर्तृनिकर्तृसंज्ञा। कर्तरि लकारः। हेतुकर्ता यथा। हितं लंभयंति विनीतान् धीराः। क्लेशाः परंलोकं गमयंति। तत्प्रयोजको हेतुश्चेति हेतुसंज्ञा। चकारात् कर्तृसंज्ञा। हेतुत्वाणिचकर्तृत्वात् कर्तरि लकारः। कर्मकर्ता यथा। स्वयमेव पच्यंते छलकुशलबुद्धयः। स्वयमेव ध्वंसंते दुष्टजनदोषाः। स्वयमेव सिच्यंते प्राकृतजनस्नेहः। कर्मवत्कर्मणा तुल्यक्रियः इति कर्मवद्भावः। अभिहितः कर्ता यथा। साधवः परार्थमापादयंति। अभिहितकर्ता यथा। साधुभिरापाद्यंते परार्थाः। कर्म सप्तविधं भवेदिति। तत्रेप्सितं कर्म यथा। दुर्विज्ञेयमपि धर्मं... धानि उदार धर्मात्क्रिमः। कर्तुरीप्सिततमं कर्मेत्यनेन कर्तृ... ...म कारकं कर्मसंज्ञं स्यात्... कर्मसंज्ञा।

३ ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् ३

अनीप्सितं कर्म यथा। कल्याणमपि शिवधर्मं प्रतिक्षिपन्ति पापबुद्धयः। तथायु
क्तं चानीप्सितमित्यनेन कर्मसंज्ञा। ईप्सितानीप्सितं कर्म। पायसं भक्षयन्नत्व
तितिरजोप्यभ्यवहरति कुमारः। तेनाहत्य त्वाद्रजसो नैवेप्सितानीप्सितत्वं। अ
पयः कथितं कर्म यथा। गां दोग्धि गोपालकः। यज्ञदत्तं याचते कंबलं ब्राह्मणः। व्रजमव
रुणद्धि गां गोपालकः। उपाध्यायं पृच्छति शास्त्रं शिष्यः। ईश्वरं भिक्षते सुवर्णमकिंच
नः। वृक्षमवचिनोति फलानि दारकः। शिष्यं धर्मं ब्रवीति गुरुः। पुत्रमनुशास्ति शा
स्त्रमुपाध्यायः। दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तं पूर्वविधौ। ब्रुव न्न
शासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना। अकथितं चेत्यनेन कर्मसंज्ञा।।

[illegible] विशेषैरवि
वक्षितं कर्मसंज्ञं स्यात् ८

चाणीमध्ये कर्तासणी कर्म स्यात् ॥२॥

कर्तृकर्म यथा। गच्छति शिष्यो ग्रामं गमयति शिष्यं ग्रामं गुरुः। गतिबुद्धिप्रत्यवसानार्थ
शब्दकर्माकर्मकाणामणि कर्तासणौ विति कर्मसंज्ञा। अभिहितं कर्म यथा। कटः क्रि
यते देवदत्तेन। अनभिहितं कर्म यथा। कटं करोति देवदत्तः। कतमत्करणं द्विविधं। बा
ह्याभ्यंतरं चेति। शरीरावयवाद्यदन्यत्तद्बाह्यं। यथा। दात्रेण लुनाति व्रीहीन्नरः।
5 परशुना छिनत्ति वृक्षं देवदत्तः। आभ्यंतरं यथा। यच्छरीरावयवाश्रितं तदाभ्यंतरं। य
था। मनसा पाटलिपुत्रं गच्छति देवदत्तः। चक्षुषा रूपं पश्यति नरः। साधकतमं करणं सं
ज्ञा। कर्तृकरणयोस्तृतीयेति तृतीया। कतमत्त्रिविधं संप्रदानं। प्रेरकं। अनुमंतृ। अनि
राकर्तृ चेति। प्रेरकं यथा। ब्राह्मणाय गां ददाति धार्मिकः। स हि ब्राह्मणेन रम्मा साधु गां

६। क्रियाविशेषणं कर्मत्वं भवेत् स्यात् ॥२६॥

(दानस्यकर्मणायंअभिप्रेतिससंप्रदानंस्यात् ५

मत्वंदेहीतिप्रेरयति। तस्मात्प्रेरकमित्युच्यते। अनुमंतृयथा। अतिथयेवृक्षमूलंददा

तितत्पाथनः। सह्यतिथिर्वृक्षमूलंमत्वंदेहीतिनतावत्प्रेरयति। तंत्त्वदीयमानंमन्य

तेतस्मादनुमंतृइत्युच्यते। अनिराकर्तृयथा। पुरुषोत्तमायपुष्पंददातिपुरुषःस

हिपुरुषोत्तमोमह्यंपुष्पंनदद्याइतिननिराकरोति तस्मादनिराकर्तृ। कर्मणायमभि

प्रैतितत्संप्रदानमितिसंप्रदानं। चतुर्थीसंप्रदानेइतिचतुर्थी। कतमद्विविधमपा

दानं। चलमचलंचेति। चलंयथा। धावतोश्वात्पतितःसारथिः। धावतोहस्तिनः

पतितोंकुशधारकः। अचलंयथा। ग्रामादागच्छतिदेवदत्तः। पर्वतादवतरंतिनराः। (

ध्रुवमपायेऽपादानमित्यपादानसंज्ञा। अपादानेपंचमीतिपंचमी। कतमच्चतु

८अपायेविश्लेषेऽसति यो ध्रुवं अवधिभूतं अपादानं

स्यात्॥८

४ कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः अधिक-
रणसंज्ञं स्यात्। औपश्लेषिकोऽभिव्यापको वैषयिकश्च॥४

यिधमधिकरणं। अभिव्यापकमौपश्लेषिकं। वैषयिकं च सामीपिकं चेति। अभिव्या
पकं यथा। तिलेषु तैलं। औपश्लेषिकं यथा। कटे आस्ते पुरुषः। शकटे आस्ते द्विजः।
वैषयिकं यथा। वनेषु शार्दूला वसंति। सामीपकं यथा। नद्यां घोषः। आधारोऽधि
करणमित्यधिकरणसंज्ञा। सप्तम्यधिकरणे चेति सप्तमी। यदि करोतीति कारक
मन्वर्थसंज्ञाकरणं तर्हि कर्तैव कारकसंज्ञो भवति। कर्मकरणसंप्रदानापादानाधिक
रणानि तु कथं कारकसंज्ञानि भवंतीत्याशंक्याह। तान्यपि सर्वाणि कारकाण्येव
कानि कुतः। तत्स्वातंत्र्यविवक्षया। प्रतिकारकं हि स्वातंत्र्यं विवक्ष्यते। तद्विवक्षया
तु सर्वेषां कारकत्वमिति। तत्र कर्त्रर्यभिहिते प्रथमैव विधीयत इति। कोऽर्थोऽभिहित

6

कर्तरि प्रथमैव भवति। यथा पचत्योदनं देवदत्तः। कटं करोति देवदत्तः। तृतीया वा
थवा षष्ठी स्मृतानभिहिते द्विधा। अस्यार्थः। अनुक्ते कर्तरि द्वे विभक्ती भवतः। तृती
या षष्ठी वेति। तृतीया यथा। ओदनः पच्यते देवदत्तेन। कर्तृकरणयोस्तृतीयेति
तृतीया। षष्ठी यथा। परलोकहितस्य सेवितव्यो धर्मः। कृत्यानां कर्तरि षष्ठी। क
र्मण्यभिहिते [illegible] विभक्तिं विद्धि पूर्विकामिति। कोर्थः। यथाऽभिहिते कर्तरि प्रथ
मा। तथा कर्मण्यभिहितेपि प्रथमैव भवति। यथा पचत्योदनं देवदत्तः। व्याक
रणं करोति पाणिनिः। तथाऽभिहिते कर्मणि यथा। ओदनः पच्यते देवदत्तेन।
अनुक्ते प्रथमां द्वितीयां पंचमीं सप्तमीं तथेति। अस्यार्थः। प्रथमां पंचमीं सप्तमीं

४ अध्वभिन्ने गत्यर्थानां कर्मणि॥ ५ क्तयोगे कर्तरि कर्मणि च षष्ठी स्यात्॥५
एते गतः चेष्टायां॥४

वर्जयित्वा शेषाश्चतस्रो विभक्तयो भवंति। काः शेषाः। द्वितीया तृतीया चतु
र्थी षष्ठी चेति। द्वितीया यथा। ग्रामं गच्छति पुरुषः। कर्मणि द्वितीयेति द्वितीया।
तृतीया यथा। पुत्रेण संजानीते पिता। पुत्रं संजानातीत्यर्थः। संज्ञोन्यतरस्यां
कर्मणि तृतीया। चतुर्थी यथा। ग्रामाय गच्छति पुरुषः। गत्यर्थकर्मणि द्वितीया
चतुर्थ्यौ चेष्टायामिति चतुर्थी। षष्ठी यथा। ग्रामस्य गंता देवदत्तः। कर्तृकर्मणोः ८
कृति नित्यमिति षष्ठी। तृतीया पंचमी चैव षष्ठी च करणे त्रिधेति। तृतीया यथा।
परशुना वृक्षं छिनत्ति देवदत्तः। कर्तृकरणयोस्तृतीयेति तृतीया। पंचमी यथा।
स्तोकान्मुक्तः। स्तोकेन मुक्त इत्यर्थः। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्
त्ववचने असत्वे करणे तृतीया पंचम्यौ स्तः

३ संप्रपूर्वस्य जानातेः कर्मणि वा तृतीया स्यात्॥३

वृचनेभ्यइतिपंचमी।षष्ठीयथा।घृतस्यसंजानीते।घृतेनमित्रंप्रेक्षत इत्यर्थः।
ज्ञोविदर्थस्यकरणे इतिषष्ठी।षष्ठी द्वितीया चतुर्थी संप्रदानेतथाभिधेति॥
षष्ठीयथा।पुरुषमृगश्चंद्रमसोदातव्यः।चंद्रायदातव्यइत्यर्थः।चतुर्थ्यर्थेबहु
लंछंदसि।इतिसंप्रदानेषष्ठी।चतुर्थीयथा।क्षुधितायअन्नंददातिदेवदत्तः।
चतुर्थीसंप्रदानेइतिचतुर्थी।तृतीयायथा।दास्यामालांप्रयच्छतेयुवा।दास्यै
मालांददातीत्यर्थः।समस्तृतीयायुक्तात्दाणश्चसाचेच्चतुर्थ्यर्थेइतितृतीया।उ र्थ्ये
भयमनेनसंभाव्यते।तृतीयाविभक्तिरात्मनेपदसाधनंच।यदयंतृतीयायुक्ता
दाणश्चसाचेच्चतुर्थ्यर्थेइति आत्मनेपदमनुशास्ति।अशिष्टव्यवहारेतृतीया।

चतुर्थी भवतीति वक्तव्यं। पंचमी स्वत्वपादानेवर्त्तते न ततो न्यथेति। पंचमी
यथा। पर्वतादवतरंति महर्षयः। अपादाने इति पंचमी। सप्तम्यवाधिकरणे। स
प्तमी यथा। ग्रामे वसति। सप्तम्यधिकरणे चेति। सप्तमी कारकस्यैव संग्रह इति।
दिङ्मात्रप्रदर्शनार्थमत्रोक्तः कारकसंग्रहः। विस्तरेण ग्रंथादिषु द्रष्टव्यः। उ
क्तेनाभिहितानभिहितयोः स्वभावः। कियंतस्तदभिधायका अनभिधायका उच्यंते।
8 केतरस्यामवस्थायामिमे चत्वारोभिधायका उच्यंते। समास[illegible] तद्धितति
ङंतश्चत्वारोभिधायकाः। केतरस्यामवस्थायामनभिधायका उच्यंते। कर्मणा वा
कर्त्रा च अभिसंबंधेना भिधायका उच्यंते। ताभ्यां कर्मकर्तृभ्यामेवानभिसंबंधे

तएवचत्वारोनभिधायकाउच्यंते।षोढाःसमासःसंक्षेपादिति।अयमर्थः।समास
संक्षेपतः षट्प्रकारो भवति।यथा।तत्पुरुषः।कर्मधारयः।बहुव्रीहिः।द्विगुः।द्वंद्वः।
अव्ययीभावश्चेति।विस्तरेण अष्टाविंशतिधा भवति।पश्चात्तस्य विभागं वक्ष्यामः।
नित्यानित्यत्वयोगेनेति द्विविधः समासो भवति। नित्यसमासोऽनित्यसमास
श्चेति। नित्यसमासो यथा। प्रकर्षेण चरः प्रचरः।कुंभं करोतीति कुंभकारः। यदि नि
त्योयं समासस्तर्हि कथं कुंभं करोतीति वाक्यं क्रियते।स्वपरशब्देनाप्यर्थप्रति
पादकं वाक्यं क्रियते। यथा स्त्रीष्वधिकृत्य कथा प्रवर्त्तते। अधिस्त्रि। कर्मण्युप
उपपदमधिकृत्य समासः। अनित्यसमासो यथा। राज्ञः पुरुषो राजपुरुषः। ब्रा

४ एतयोरन्यपदस्य सुपो लुक् स्यात्॥ ३ इति मातृभ्रातादिभ्यः कृतैः सह वा समस्यते सतत्पुरुषः॥३

त्मणस्य कंबलः ब्राह्मणकंबल इत्यादि। षष्ठीति समासः। विभाषितत्वाद् नि
त्यसमुच्यते। लुगलुक्केन चाद्ध्येति। लुक्समेः लुक्समासश्चेति। लुक्समा
सोयथा। कष्टंश्रितः कष्टश्रितः। द्वितीया श्रिता तीत पतित गतात्यस्त प्राप्तापन्नै
रिति समासः। सुपो धातुप्रातिपदिकयोरिति सुपो लुक्। अलुक्समासो
१ यथा। कंठेगडुर्यस्य कंठेगडुः। उरसि लोमानि यस्य स उरसिलोमा। सप्तम्युप
मानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदस्य चेति समासः। सुपो धातुप्रातिप
दिकयोरिति सुपो लुकि प्राप्ते लुगंतपदस्याधिकत्प। अमूर्द्धमस्तकात्स्वांगा
दकामे प्रथमातत्पुरुषः। द्वितीयातत्पुरुषः। तृतीयातत्पुरुषः। चतुर्थीतत्पुरुषः।

पंचमीतत्पुरुषः। षष्ठीतत्पुरुषः। सप्तमीतत्पुरुषः। नञ्तत्पुरुषः। प्रथमात
त्पुरुषोयथा। पूर्वः कायस्य पूर्वकायः। अपरः कायस्य अपरकायः। पूर्वापरा
धरोत्तरमेकदेशिनैकाधिकरणेनेतिसमासः। अर्द्धं पिप्पल्याः अर्द्धपिप्पली।
अर्द्धं कोशातक्याः अर्द्धकोशातकी। अर्द्धं नपुंसकं इतिसमासः। द्वितीयं भिक्षा
याः द्वितीयभिक्षा। तृतीयं भिक्षायाः तृतीयभिक्षा। चतुर्थं भिक्षायाः चतुर्थ
भिक्षा। तुरीयं भिक्षायाः तुरीयभिक्षा। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्या
मिति समासः। ग्रामं जीविकां ग्रामजीविकः। आपन्नो जीविकामापन्नजीवि
कः। प्राप्तापन्ने च द्वितीययेति समासः। कस्मात् प्रथमा तत्पुरुष उच्यते ५

या

पूर्वपदस्यप्रथमांतत्वात्तृयाविभक्तिः पूर्वपदस्यभवति। तैंयाविभक्त्या विशेषितः।
तस्मात्प्रथमात्तत्पुरुष इत्युच्यते। द्वितीयातत्पुरुषो यथा। वृक्षमाश्रितः वृक्षाश्रितः।
कांतारमतीतः कांतारातीतः। नरकं पतितो नरकपतितः। ग्रामं गतो ग्रामगतः।
त शरमस्तः शरास्तः। तरंगमपस्तः तरंगापस्तः। सुखं प्राप्तः सुखप्राप्तः। दु-
खमापन्नः दुःखापन्नः। द्वितीयाश्रितातीतगतास्तप्राप्तापन्नैरिति समासः। पति
10 वर्षभोग्यो वर्षभोग्यः। योजनं प्रविष्टो योजनप्रविष्टः। कालाध्वनोरत्यंतसंयो-
गे चेति समासः। तृतीया तत्पुरुषो यथा। शंकुलया खंडः शंकुलाखंडः। तृती-
यातत्कृतार्थेन गुणवचनेनेति समासः। चतुर्थी तत्पुरुषो यथा। यूपाय दारुः

कुंडलाय हिरण्यं

यूपदारु। कुंडलहिरण्यं। तादर्थ्ये चतुर्थी वक्तव्येति चतुर्थी। अर्थेन सह नित्यसमा सवचनं सर्वलिंगता च वक्तव्येति। ब्राह्मणायं सूपः ब्राह्मणार्थः सूपः। ब्राह्मणायेयं भूः ब्राह्मणार्था भूः। ब्राह्मणायेदं पयो ब्राह्मणार्थं पयः। कुबेराय बलिः। कुबेरबलिः। तस्मै हितं तद्धितं। आत्मने सुखं आत्मसुखं। विश्वस्मै रक्षितं विश्वरक्षितं। तदर्थार्थबलिहितसुखरक्षितैरिति समासः। पंचमीतत्पुरुषो यथा। सिंहाद्भयं सिंहभयं। चौराद्भयं चौरभयं। दस्युभ्यो भयं दस्युभयं। पंचमी चेति समासः। अर्थाद्पेतोऽर्थापेतः। सुखादपोढं सुखापोढं। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः इति समासः। षष्ठीतत्पुरुषो यथा। वृक्षस्य मूलं वृक्षमूलं। वृक्ष

पितरश्चेवानतं २६ अथ शकलानां स्वरूपगुणनामानि उच्चैर्मध्यं खारिजं हाखिलं स्थान्नी
चैः मध्यंत तद्वयोर्मुन्किलिबं उच्चैः नीचैश्चापि रेखा यदि स्थानं तु प्रोक्तं सावितंनामरवे
दुं २७ लघ्वानुसर्त्तुलखारिजं कवजुलखारिजं ततः अतवेखारिजं चैषामाग्नेयानां
हि शकदिक २८ फरहाद्धेजतमाकुन्ते अतवेहाखिलं तथा एतानि वायवीयानि प्रती
चीसंस्थितानि तु २९ वधाजारवं नकीनामनुसर्तु हाखिलं तआं तरीकं चाप्यसंज्ञानि श
कलान्युत्तराणि च ३० आतेकवजुहाखिलमिनकीसंचोकलाजमातंच पार्थिवसंज्ञा
न्येषां दक्षिणादिक्रचापि शकलानां ३१ आग्नेयशकलं पीतमा
रक्तं वायवं स्मृतं श्वेतमाप्यं पार्थिवं च श्यामं सामान्यतः स्मृ
तं ३२ आग्नेयं वायवं चाप्यं पार्थिवं चतुरीयकं एकैकशकं
लविंद्यादपि स्थानचतुष्टयं ३३ लघ्वोमध्यत्रिमात्रा ≡ पु

यथा खारिजं	यथा मुन्किलिबं
यथा हाखिलं	यथा सावितम्

र·सा·॥ रषमदुमुभा ।पीत सउँ ध दी घीचाम्रेयी खोरिजं प्रक नगरगाहन योवी सिनीचाति मोऽयः
॥२॥ हेतुर्निर्मा णप्रुष्यो रिपुरपिदहनः खंडिताने वप्रुरूा स्वा दाती क्षणा पिक द्वि धनु मिगुरगु
ताधातुरुस्यानि मूलं॥२४॥नु सत्तुं लखा रिजं मूल्य द्वयं मात्रा द्वयं सह ०॥स्थितं प्राग्वि सिंत
भ्यां दूर्णं शीघ्रोस्य दूर्वं वत्॥२५॥कवजुलखोरिज मप्रुमं मूल्यं मात्राचे द्वयं ० मूयः॥गिरिव
नवास ममौस्यं घाट केतुप्रुतंच दूर्वं वत्प्रोक्तः॥२६॥पुर स्ता त्रिमूल्यं तत प्रोक्त रेखा ० नवे ख
रिजं खंडितं॥पीत कृष्णं॥नमः कुंमधुक मोऽस्य हीनं नमंडं वनग्राम वासं परैः दूर्वं तुल्यं॥२७॥इस
ने यपाकलानि॥मिष्टो सौवायवीजः फरहद्रति प्रुमान्मूल्य प्रुग्मं चरे खा मूल्यं प्वेता रुता
० मः प्रुमन्दु कठिनः सप्रमे प्रुकं प्रुरुः सङ्घोवर्त्तुलोच्चे मुन कलि वमितः॥खंडिते कोऽस्य मो
स्यां॥स्ती क्षणा धारास्य शत्रुर्नेट नगरगहा रामयोर्थे द्विराम॥२८॥शिल्पं निर्मित हेतुर्जीवोवा ॥राम
प्रुम्न प्रुष्टि हेतू वौ॥जन्मानि मूलं जीवः पश्चिम दिक् फरह शाकलस्य॥२९॥रेखा द्वयांतर ॥२

३ स तत्पं तं श्रौं आदभिः प्राप्नुतं॥ अधिश्रित्य [illegible] २ रुभिः पक्वं तं सम [illegible] जकाभ्यां कर्तृ [illegible]
प [illegible] अधु [illegible] ३ [illegible] ३ । तिम [illegible] ॥२

12 स्यफलंवृक्षफलं। षष्ठीतिसमासः। ब्राह्मणस्ययाजको ब्राह्मणयाजकः। क्षत्रिय
स्ययाजकः क्षत्रिययाजकः। याजकादिभिश्चेतिसमासः। सप्तमीतत्पुरुषोयथा।
अक्षेषुशौंडः अक्षशौंडः। अक्षेषुधूर्तः अक्षधूर्तः। सप्तमीशौंडैरितिसमासः।
पाटलिपुत्रासिद्धः पाटलिपुत्रसिद्धः। कांपिल्येसिद्धः कांपिल्यसिद्धः। सिद्धशुष्कप
अ क्वबंधैश्चेतिसमासः। नञ्तत्पुरुषोयथा। नब्राह्मणो अब्राह्मणः। नवृषलो अवृ
षलः। नञितिसमासः। सस्यधाकारयः। कतमोविशेषणपूर्वपदः। विशेष्यपूर्वपदः।
विशेषणोभयपदः। उपमानपूर्वपदः। उपमानोत्तरपदः। संभावनापूर्वपदः। अवधा
रणापूर्वपदश्चेति। विशेषणपूर्वपदोयथा। नीलंचतदुत्पलंचेति नीलोत्पलं। कृष्ण

[illegible] सुपा [illegible]॥६ ३ मेधा

३ भेदकं भेद्येन समाना धिकरणेन बहुलं । ९ ।

असौ सर्पश्चैतिहस्स सर्पः । विशेषणं विशेष्येण बहुलमिति समासः । विशेष्य
पूर्वपदो यथा । वैय्याकरणश्च खसूचीचेति वैय्याकरण खसूची ॥ कुत्सितानि
कुत्सितैरिति समासः । विशेषणोभयपदो यथा । शीतंच नवुष्णंचेति शीतोष्णं ।
अत्रापि विशेषणं विशेष्यैर्बहुलमिति समासः । उपमान पूर्वपदो यथा । शंख इव
च पांडुरः शंखपांडुरः । उपमानानि समानाधिकरणैरिति समासः । उपमाने
त्तरपदो यथा । पुरुषोयं व्याघ्र इव पुरुषव्याघ्रः । नरोयं सिंह इव । नरसिंहः । पुरु
षोयं ऋषभ इव पुरुषऋषभः । उपमितव्याघ्रादिभिः सामान्याप्रयोग इति समासः ।
संभावनापूर्वपदो यथा गुणइति बुद्धिः गुणबुद्धिः । पुत्र इति ग्रहं पुत्रग्रहं । विशे

षणं विशेष्येण बहुलमिति समासः। अवधारणपूर्वपदो यथा। गुण एव धनं गुणधनं। सु

कृतमेव बंधुः सुकृतबंधुः। मयूरव्यंसकादयश्चेति समासः॥ पंचधा बहुव्रीहिः। द्विप

दः बहुपदः संख्योत्तरपदः संख्योभयपदः सहपूर्वपदः। द्विपदस्तावत्। आरूढ वानरो

13 यं वृक्षः स तथा। रूढवानरो वृक्षः। निर्जितः कामो येन स भगवता निर्जितकामो भगवान्।

उपनीतं भोजनं यस्मै ब्राह्मणाय स भवत्युपनीतभोजनो ब्राह्मणः। निःक्रांता जना य

स्मान्नगरात्तद्भवति निःक्रांतजनं नगरं। शुक्लः पटो यस्य पुरुषस्य स भवति शुक्लपटः

पुरुषः। उषितो नरो यस्मिन् ग्रामे स भवत्युषितनरो ग्रामः। शेषं बहुव्रीहिरित्यधि

कृत्य अनेकमन्यपदार्थ इति बहुव्रीहिसमासः। बहुपदो यथा। पराक्रमेणोपार्जिताः

संपदो यैः ते पराक्रमेणोपार्जितसंपदः। पूर्ववत्समासः। संख्योत्तरपदो यथा। समीपे द
शानामिमे पुरुषाः उपदशाः। समीपे विंशतेरिमे पुरुषाः उपविंशाः। संख्योभयपदो
यथा। द्वौ वा त्रयो वा परिमाणमेषां द्वित्राः। संख्ययाव्ययासन्नादूराधिकसंख्याः संख्ये
य इति बहुव्रीहिसमासः। बहुव्रीहौ संख्येये डजबहुगणादिति समासांतः। सहपूर्वपदो
यथा। सह मूलेन यद्(?)उद्धृतस्तरुः स भवति समूलोद्धृतस्तरुः। तेन सहेति तुल्ययोग इति सम
सः। सोपसर्जनस्येति सहशब्दस्य सभावः। व्यतिहारलक्षणो यथा। केशेषु केशेषु गृहीत्वा
युद्धं प्रवृत्तं केशाकेशि युद्धं। दण्डैश्च दण्डैश्च प्रहृत्य युद्धं प्रवृत्तमिति दण्डादण्डि युद्धं। तत्र तेनेदमिति
सरूपे इति समासः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। इच्कर्मव्यतिहारे इति सम

यस्येतिचकारलोपः। तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावः। अव्ययीभावश्चेत्यव्ययसंज्ञा।
अव्याद्वापइतिसुपोलुक्। दिगंतराललक्षणे यथा। दक्षिणस्याश्च पूर्वस्याश्च दिशोयदं
तरालं सा दक्षिणपूर्वा। उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदंतरालं सोत्तरपूर्वा। दिङ्नामा
न्यंतराल इति समासः। सर्वनाम्नोवृत्तिमात्रे पूर्वपदस्य पुंवद्वचनमितिपुंवद्भावः।
14 द्विगुराभाषितेद्विधेति। कथमेकवद्भावोनेकवद्भावीचेति। एकवद्भावीयथा। त्री
णिशृंगाणिसमाहृतानि त्रिशृंगं। पंचपूलाः समाहृताः पंचपूली। तद्धितार्थोत्तरपद
समाहारेचेतिसमासः। संख्यापूर्वो द्विगुरिति द्विगुसंज्ञायां द्विगुरेकवचनमित्येकव
द्भावः। सनपुंसकमितिनपुंसकत्वं। अकारांतोत्तरपदो द्विगुः स्त्रियां भाष्यत इति स्त्री

लिंगतायां। द्विगुरिति ङीप्। त्रिभृंगादिभ्यस्तु न भवति। अनेकवद्भावो यथा। चतस्रो दिशः
त्रयो लोकास्त्रिलोकाः। दिक्संख्ये संज्ञायामिति समासः। द्वंद्वश्चतुर्विधः। कथं। समु
च्चयः। समाहारः। अन्वाचयः। इतरेतरश्चेति। तत्र समुच्चयान्वाचययोरसामर्थ्यात्
समासो नास्ति। समर्थः पदविधिरित्यधिकारात्। समुच्चयो यथा। देवदत्तः पचति य
ज्ञदत्तश्च। अन्वाचयः। भिक्षामट गां चानय। समाहारो यथा। शंखश्च पटहश्च शंखप
टहं। द्वंद्वश्च प्राणितूर्यसेनांगानामित्येकवद्भावः। नपुंसकमिति नपुंसकत्वं। इतरेत स
रयोगो यथा। देवदत्तयज्ञदत्तौ चिदं कुरुतः। चार्थे द्वंद्वः समासः। अव्ययीभावो द्विधाम
तरति। कथं नाम पूर्वपदोऽव्ययपूर्वपदश्चेति। नामपूर्वपदो यथा। शाकस्य मात्रा। शाक
प्रति फलस्य मात्रा। फलप्रति। सुप्रति नाम मात्रार्थेऽव्ययीभावसमासः। अव्ययपू

र्वपदो यथा। कुंभस्य समीपे वर्त्तते तदुपकुंभं। अव्ययं विभक्तीनामिति समासः ५
अव्ययीभावश्चेत्यव्ययसंज्ञा। क्रममनतिक्रम्य वर्त्तते इति यथाक्रमं। ये ये वृद्धा यथा
वृद्धं (ब्राह्मणा नामंत्रयस्व) यथा सादृश्ये इति समासः। याव अंत्रं ब्राह्मणा नामं
सं ६ त्रयस्व यावद्रूपमंत्राणि भवंति तावतो ब्राह्मणा नामंत्रयस्व। यावदवधारणे इत्य
व्ययीभावसमासः। तेषां पुनः समासानां प्राधान्यं तु चतुर्विधमिति। तद्यथा॥
15 पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानः। अन्यपदार्थप्रधानः उभयपदार्थप्रधानः।
पूर्वपदार्थप्रधानो यथा। प्रासेजौवि कांप्रासजौ विकः उत्तरपदार्थप्रधानो यथा।
राजपुरुषः। कर्मधारयो द्विधा प्रधानः। पूर्वपदार्थप्रधान उत्तरपदार्थप्रधानश्चेति।
पूर्वपदार्थप्रधानो यथा पुरुषर्षभः। उत्तरपदार्थप्रधानो यथा। नीलोत्पलं। बहुव्रीहि

द्विःप्रधानश्चेति।अन्यपदार्थप्रधानः।उभयपदार्थप्रधानश्चेति।अन्यपदार्थप्रधानो
यथा।आरूढवानरो वृक्षः।चित्रगुर्देवदत्तः।उभयपदार्थप्रधानो यथा॥द्वन्द्व।द्वंद्वउ
भयपदार्थप्रधानएवयथा।शंखपरहौ।द्विगुःउत्तरपदप्रधानएव।यथा त्रिशृंगं।
अव्ययीभावस्त्रिधाप्रधानः।पूर्वपदार्थप्रधानः।उत्तरपदार्थप्रधानः।अन्यपदार्थ
प्रधानश्चेति।पूर्वपदार्थप्रधानो यथा।आकूमाति।अन्यपदार्थप्रधानो यथा।उपकुंभं।
उत्तरपदार्थप्रधानो यथा।शाकूमाति।अन्यपदार्थप्रधानो यथा।उन्मत्तागंगायस्मि
न्देशे सउन्मत्तगंगो देशः।अन्यपदार्थेचसंज्ञायामितिसमासः।स्त्रियांपुंवद्भाषित
पुंस्कादनूङ्‌समानाधिकरणेस्त्रियाः।पूरणप्रियादिष्विति पुंवद्भावः।इत्थं कृ समासलक्ष

अथ प्रस्तावावसरं तद्धितलक्षणं विधास्यामः। सामान्याव्ययभावाख्यस्त्रिविधो
तद्धितस्तद्भवति। सामान्यवृत्तिरव्ययसंज्ञो भावश्चेति। स एव पदानां तु समर्था
नां प्रथमेव प्रसूयत इति। अनेन परस्परं समर्थानां पदानां प्रथमा। यावदेव
पदादानंतद्धितप्रत्ययः प्रसूयते। तत्र सामान्यवृत्तिस्तावत्। मतुप्। लच्। श। इलच्
16 न। इलच्। णः। उरच्। वः। वलच्। इनि। वन्। विनि। युस्। ग्मिनि। आलच्। आटच्। एन
च्। आरक्। आलुच्। चूलु। तुल्। आण्। चुण्। युंण्। खञ्। स्कंञ्। कन्। यन्। टक्। एर अन्न
क्। घ। खो। ओरक्। ण्यः। यं। कृत्। इलच्। ईलं। आनङ्। चुंचुप्। चणप्। इष्ठं। ईयस्। न
तरप्। तरां। तमां। तमप्। कल्पप्। देश्य। देशीयर्। जातीयर्। द्वयसट्। दघ्नट्। मात्रच्।

तर रूपप् तव

वकू । इतिपंचाशन्मत्वर्थ्या भवंति ॥ मनुप्यथा । गुणो यस्यास्ति यस्मिन्वा स भवति
५ सगुणवान् । गुणौ विद्येते ययोस्तौ गुणवंतौ । गुणा येषां वा संति ते गुणवंतः । गुणो य
स्या अस्ति सा गुणवती । गुणवत्यौ । गुणवत्यः । गुणो यस्यास्ति यस्मिन्वा भवति
गुणवत्कुलं । गुणवती कुले । गुणवंति कुलानि । तदस्यास्त्यस्मिन्निति मनुप् ॥
मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मकारस्य वकारः । लच् । चूडा यस्यास्ति यस्मि
न्वा स भवति चूडालः । प्राणिस्थादातो लजन्यतरस्यामिति लच् प्रत्ययः । वत्सं का
मयते वत्सलः । अंशोऽस्यास्तीति अंशलः । वत्सांशाभ्यां कामबले इति लच् । इलच् यथा ।
फेनोऽस्यास्तीति फेनिलः । फेनादिलच्चेति इलच् प्रत्ययः । तुंदोऽस्यास्तीति तुंदिलः । १

तुंदादिभ्यश्चेतिइलच् । शयथा । लोमानियस्यास्तीतिलोमशः । नयथा । पामायस्या
स्तीतिपामनः । इलच्यथा । पिंछंयस्यास्तीतिपिंछिलः । लोमादिपामादिपिंछादिभ्यः ।
शनेलचइतिशनुइलच्इत्येतेप्रत्ययाभवंतियथासंख्यं । णोयथा । प्रज्ञायस्यास्तीतिस
प्राज्ञः । श्रद्धायस्यास्तिसश्राद्धः । अर्चायस्यास्तिसआर्चः । वृत्तिर्यस्यास्तिसवार्त्तः ।
17 प्रज्ञाश्रद्धार्चावृत्तिभ्योणइतिणप्रत्ययः । उरच्यथा । दंताउन्नतायस्यसदंतुरः । दं
तउन्नतउराजिपुरच्प्रत्ययः । वःयथा । केशोयस्यास्तिकेशवः । केशाद्वोन्यतरस्यां
मितिवप्रत्ययः । वप्रकरणे । मणिहिरण्ययोरुपसंख्यानं । मणिर्यस्यास्तिसमणिवः ।
हिरण्यवः । वलच्यथा । रजोयस्यास्तीतिसरजस्वलः । रजोऽस्यास्तीतिसारजस्वला ।

रजः लच्य ३ स्तुतिपर्वजो बलच् २ त्नूयथा । धनंयस्या स्तीति सधनी । वक्तूयथा । धनंयास्य
स्तीति सधनिकः । अत इनि ठनौ । विनि ठको । वस्येक इति इकादेशः । विनियथा । यशो ३
स्यातीति यशस्वी । मायायस्य । स्तीति मायावी । मेधायस्य । स्तीति मेधावी । स्त्रग्वी
मायामेधास्त्रजो यशस्वी विनि रति विनिः । युस्यथा । ऊर्णायस्या स्तीति ऊर्णायुः ।
ऊर्णाया ः युस्तितियुस् । ग्मिनि यथा । वागस्या स्तीति वाग्मी । वाचोवाग्मिरितिग्मि नि
निः । सोच्चेतिदीर्घः । खरो ः खरि सवर्णे इति गलोपः । आलच् यथा । योबलस्संबद्धमा
पतेसयाचारः । वाचालः । आलजाट्यौ बहुभाषिणि इत्यालजाटचोः प्रत्ययो भवतः ।
इन्नच् यथा । फलानियस्या स्तीति फलिनः । बर्हाणि यस्या स्तीति बर्हिणः । फल

गं यस्या स्त्रीति शृंगारकः। शृंगार शार काभ्यां मारकू चक्रेभ्यः आलुच् यथा। १
बर्हिभ्यां निनि जिति इनच्। आरकू यथा। निद्रायस्या स्त्रीति निद्रालुः। तंद्रायस्या
स्त्रीति तंद्रालुः। श्रद्धायस्या स्त्रीति श्रद्धालुः। निद्रातंद्राश्रद्धाभ्य आलुच् प्रत्ययः।
शीतं न सहते शीतालुः। उष्णं न सहते उष्णालुः। त्रपां न सहते त्रपालुः। शीतो स्म च
पाभ्यस्तं न सहत इति चालुर्वक्तव्यः। चेलुर्यथा। हिमं न सहते हिमेलुः। हिमा चेलुः
हिमं न सहत इति चेलुर्वक्तव्यः। चूलुर्यथा। बलं न सहत इति बलूलुः। बालचू
लुस्तं न सहत इति चूलुर्वक्तव्यः। ऊलुर्यथा। वातानां समूहो वातूलुः। वातं न स
हत इति वा। वातानां समूहे अपस्तं न सहत इति ऊलुर्वक्तव्यः। अणू यथा। वासिष्ठ
स्यापत्यं वासिष्ठः। ऋष्यंधकवृष्णिकुरुभ्यश्चेत्यण्। उपगोरपत्यं औपगवः। आ

ग्रीष्येर्णित्यधिकृतस्य तस्यापत्यमित्यण् प्रत्ययः। अश्वपतेरपत्यमाश्वपतः। अश्वपत्यादिभ्यश्चेत्यण्। जनपदनिवासोऽस्य जानपदः। तस्य निवास इत्यण्। व्याकरणमधीते वेत्ति वा वैय्याकरणः। तदधीते वेत्ति वा इत्यण्। णकारः वृद्धिरैदौ इत्यत्र विशेषणार्थः। वुण् यथा। क्रममधीते वेत्ति वा क्रमकः। पदमधीते वेत्ति वा पदकः। क्रमादिभ्यो वुणिति वुण्। युवु इत्यकादेशः। खञ् यथा। प्रियंगूनां भवनं क्षेत्रं प्रैयंगवीनं। मुद्गानां भवनं क्षेत्रं मौद्गीनं। जौलक्षीयं। धानीनं। धान्यानां भवने क्षेत्रे खञिति खञ्। उत्सस्यापत्यं औत्सः। उत्सादिभ्योऽञित्यञ्। अञ् यथा। पंचालस्यापत्यं पांचालः। जनपदस्यापत्यं जानपदः। पंचालजनपदक्षत्रियादित्यञ्। कञ् यथा

अश्वलस्यापत्यं आश्वलायनः। नडादिभ्यः फगिति फक्। यञ्यथा। गर्गस्यापत्यं गा
र्ग्यः। गर्गादिभ्यो यञिति यञ्। ढक्यथा। विनताया आपत्यं वैनतेयः। सुपर्णायाः
आपत्यं सौपर्णेयः। गंगायाः आपत्यं गांगेयः। स्त्रीभ्यो ढगिति ढक्। ऐरक्यथा।।
19 चटकायाः आपत्यं चाटकैरः। चटकाया ऐरक्। द्रक्यथा। गोधाया आपत्यं गौधेरः। गो
धाया ढ्रगिति द्रक्। लोपो व्योर्वलीति यकारलोपः। आरक्यथा। गोधाया आपत्यं दुष्ट
गौधारः। आरगुदीचामित्यारक्। घयथा। क्षत्रस्यापत्यं क्षत्रियः। क्षत्रा घ इति घः।
खयथा। कुलस्यापत्यं कौलीनः। कुलात्खः इत्यनेन। आयनेयीनीयियः फढखछघां
प्रत्ययादीनामित्यायनाद्यादेशः। ण्यपथा। कुरोरपत्यं कौरव्यः। कुर्वादिभ्यो ण्यः

तिण्यः। यन्नूयथा। मूर्ध्नि भवो मूर्द्धन्यः उरसि भवो उरस्यः दंते भवो दंत्यः। मूर्द्धन्नूरुरस्
दंतादिभ्यो यत्। इत्नूयथा। सुरभिगंधोऽस्य सुरभिगंधिः। गंधस्येत्पूतिसुरभिस्वरूपस्य
यः। कुमुदस्येव गंधो यस्य स कुमुदगंधिः। करीषस्येव गंधो यस्य स करीषगंधिः। सप्त
म्युपमानपूर्वपदस्य। उत्तरपदलोपश्चेति समासः। उत्तरपदस्योपमानाच्चेति समासांतः।
इतचूयथा। कुसुमानि संजातानि यस्य स कुसुमितो वृक्षः। तदस्य संजातं तारकादिभ्य
श्चेति इतच्। अनङ् यथा। कुंडमप्रमाणमिव ऊधो यस्याः सा कुंडोध्नी। एवं घटोध्नी। जा
लोध्नी। ऊधसोऽनङ्प्रत्ययः। सकारस्यादेशः। प्रत्ययसंयोगो बहुव्रीहेः ऊधसोऽनीति ङी
प्प्रत्ययः। कुसुममेव धनुर्यस्य स कुसुमधन्वा। धनुषश्चेत्यनङ्। सकारस्य समासांतः।

चणे यथा। दर्पेण वित्तो दर्पचणः। केशेन वित्तः केशचणः। चंचुप् यथा। शब्देन वित्तः
शब्दचंचुः। तेन वित्तश्चुंचुप्चणपौ प्रत्ययौ भवतः। चुप् इति इत्संज्ञा न भवत इति
तस्यानित्यत्वात्। इष्ठन् यथा। सर्व इमे पटवः। अयमेषामतिशयेन पटुः पटिष्ठः।
अतिशायने तमबिष्ठनाविति इष्ठन्। टेः। इष्ठेमेयस्सु तिरिटेर्लोपः। सर्वेषामतिशये
20 न प्रियः प्रेष्ठः। एवं स्थिरस्थेष्ठः। स्फिरस्फेष्ठः। उरुर्वरिष्ठः। बहुलबंहिष्ठः। गुरु
गरिष्ठः। वृद्धवर्षिष्ठः। तृप्र त्रपिष्ठः। दीर्घद्राघिष्ठः। वृन्दारकवृंदिष्ठः। प्रियस्थि
रस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्र
प्द्राघिवृन्दाः। प्रकृत्येकाजिति प्रकृतिभावः। सर्वेषामतिशयेन स्थूलः स्थविष्ठः।
ह्रि

एवं दूरादविष्ठः । युवन्यविष्ठः । ह्रस्व ह्रसिष्ठः । क्षिप्रक्षेपिष्ठः । क्षुद्रक्षोदिष्ठः । स्थूल
दूरयुवह्रस्वक्षिप्रक्षुद्राणामं तस्यादेर्लोपो गुणश्च नामिना मित्यस्यादेर्लोपो नामिनां
गुणो भवति । सर्वेषामतिशयेन बहु भूयिष्ठः । बहोर्यादिर्भूश्चेति भूरादेशो यादे
श्च । सर्वेषामतिशयेन वृद्धो ज्येष्ठः । वेत्यनुवर्तमाने वृद्धश्चेति ज्यादेशः । एवं श्रेष्ठः ।
प्रशस्य स्यश्च इति श्रादेशः । वेत्यनुवर्तमाने । सर्वेषामतिशयेन लघुः लघिष्ठः ।
एवं म्रदिष्ठः । कृश । क्रशिष्ठः । पृथु प्रथिष्ठः । अतो नेह ऋ आदेर्लघोरिकारस्य र
फः । तत्रादिष्वेवस्सुबहुलमिति । लघुपृथुमृदुबहुप्रभृतीनामुकारलोपः । अति
शयेनान्तिकः नेदिष्ठः । अतिशयेन बाढः साधिष्ठः । अन्तिकबाढयोर्नेदसाधाविति

त्ता वादेशो भवत्ः। अतिशयेनतनुस्तनिष्ठः। एवमनुः अनिष्ठः। श्येतश्येतिष्ठः। श्या
मः। श्यामिष्ठः। हरितः। हरितिष्ठः। पंजरः पंजरिष्ठः। ईयसुस्यथा। द्वाविमौ। पटू।
अयमनयोरातिशयेनपटुः पटीयान्। पूर्ववदुकारलोपः। एवंस्थूलः। स्थवीयान्।
एवंदूरः दवीयान्। युवाकनत्थंकनीयान् यवीयान्। पूर्ववत्तस्यालोपोगुणश्चना
मिनो। युवाल्पयोः कन्वतिकनादेशः। एवंक्षिप्रः। क्षेपीयान्। क्षुद्रक्षोदीयान्।
प्रियः प्रेयान्। स्थिरस्थेयान्। स्फिरः स्फेयान् उरुवरीयान्। गुरुगरीयान्। ल
घुलघीयान्। बहुलबंहीयान्। तृप्रत्रपीयान्। दीर्घद्राघीयान्। कृशक्रशीयान्
वृद्धवर्षीयान्। वृंदारकः। वृंदीयान्। दृढद्रढीयान्। महान्। महीयान्। अंतिकनेदी

21

यान्। बाढ। साधीयान्। कृश क्रशीयान्। मृदु म्रदीयान्। श्रेतः श्रेतीयान्। बलवली
यान्। स्थ्ष ज्यायान्। ज्यादादीयस इति। ज्याद् उत्तर ईयस ईकारस्य च आकार भवति। अ
ल्पः अल्पीयान्। श्याम: शामीयान्। पिंजर: पिंजरीयान्। द्विवचन विभज्योप
पदे तरवीयसुनाविति ईयसुन्प्रत्ययः। तरप्यथा। अयमतिशयेन कुमार: कुमारतर:।
अयमतिशयेन पटुः पटुतर:। कृशतर:। गुरुतर:। लघुतर:। द्विवचन विभज्योप
तंयथा रवीयसुनाविति तरप्प्रत्ययः। सर्वेषामतिशयेन पचति पचतितरां। आख्यातकि
मेकारांतेभ्यः क्रियागुणप्रकर्षे इति अ एव तरांतमां इति। तमं यथा। सर्वेषामति
शयेन मृद्वी मृदुतमा। अतिशयेन चपल चपलतमा। अतिशयेनाभिरूपा अभिरूपतमा

तमपयथा।

६ रूपप्‌यथा प्रशस्तोवैयाकरणोवैयाकरणरूपः। प्रशस्तः पटुः पटुरूपः। प्रशंसायांरूपप्‌
अतिशयेनतमविष्टतमा चिततमा चितितमप्‌। कल्पपूयथा। ईषदिंद्रोनसमाप्यते।
इंद्रकल्पः। ईषद्ब्रह्मानसमाप्यतेब्रह्मकल्पः। ईषत्सूर्योनसमाप्यतेसूर्यकल्पः। दे
श्योयथा। ईषत्पर्वतोनसमाप्यतेपर्वतदेश्यो मेघः। देशीयरयथा। ईषद्राजानस
माप्यतेराजदेशीयः। ईषदपरिसमाप्तौकल्पदेश्यदेशीयरः सुप्तेतेप्रत्ययाभवंति प्र
जातीयरंथा। पटुप्रकारः पटुजातीयः। मृदुप्रकारोमृदुजातीयः। समानप्रकारः स
मानजातीयः। प्रकारवचनेजातीयर। द्वयसच्यथा। ऊरुप्रमाणमस्यजलस्य
ऊरुद्वयसंजलं। दघ्नचयथा। जानुप्रमाणजलमस्यजलस्यजानुदघ्नं। मात्रच्यथा।
आस्यंप्रमाणमस्य आस्यमात्रं। प्रमाणेद्वयसच्दघ्नच्मात्रच्इत्येतेप्रत्ययाभवंति।

२१

वकुपथा। द्वारे नियुक्तो दौवारिकः। तत्रानियुक्त इति वक्तु। द्वारादीनां चेति ऐजागमः। रे
अक्षैर्दीव्यति आक्षिकः। खनित्रेण खनति खानित्रिकः। मुष्टिना जयति मौष्टिकः।
नेन दीव्यति जयति खनति जितामिति वक्तु। दध्ना संस्कृतं भोजनं दाधिकं। दध्नष्ठक्। म
रीचेन संस्कृतं मारीचिकं। नेन संस्कृतमिति वक्तु। वस्य इकादेशः। कितिचेति तद्धिते
ष्वचामादेरिति वृद्धिः। इति सामान्यवृत्तितद्धितेः समाप्तः॥ ॥अथाव्ययाख्यत
द्धितः क्रमः॥ तसिल्। त्रल्। अधुना। दानीं। दा। [illegible]र्हिं। ह। अत्। था। थाल्। थमु। स्तातिः। अ
धुन्। अं। तसुच्। आ। तिं। समासिण्। रघु। विस्। स्युस्। आ। ति। दिष्टा। ति। [illegible]र्दा
च तिक। एनप्। आच्। आहि। धा। ध्यमुञ्। धमुञ्। सधा। आम्। इति तद्धितं शताव्ययाः॥ २२

सवस्त्र। उत्त। आदि। त ... स्याम्। रचू। पा। शपूयथा। एक।

तसिल् यथा। यस्माद्यतः। तस्मात्ततः। अमुष्मादमुतः। एतस्मात् इतः। अस्मादतः।
परमात्स्म परतः। प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञा ज्ञेया। त्यदादीनामित्यत्वं ॥
९३ ३ इदम इश् इति इश्। एतदश् अस्भावः। तद्धेतुश्च सर्वविभक्तिरित्यव्ययसंज्ञा। अ
व्ययादाप्सुपः इति सुपां लुक्। आदेः अदितः इति वचनात्। किंसर्वनामबहुभ्यो द्व्या
३ दिभ्यः इत्यधिकृत्य पञ्चम्यास्तसिल् इति तसिल्। त्रल् यथा। यस्मिन्यत्र। तस्मिन्त
त्र। सर्वस्मिन् सर्वत्र। अमुष्मिन्नमुत्र। सप्तम्यास्त्रलिति त्रल्। अदसो सैव...
कारस्य उत्वं (इदंकारस्य)। अधुना। यथा। अस्मिन् काले अधुना इति निपात्यते। कि
५ निपात्यते। इदमो ऽश् अयो धुनाच्प्रत्ययश्चेति। यस्येत्सकारलोपः। दानीं यथा। ५
अधुने रित्यिदकारेमत्वं ... ३
स्य

अन्यतनेर्हिलन्यतरस्यां इति

अस्मिन्काले इदानीं। दानीं चेति दानीं प्रत्ययः। इदम इशिति इदम इश्भावः। दा यथा।
सर्वस्मिन्काले सर्वदा। सदा वा। एकदा। अन्यदा। कदा। यदा। तदा। सर्वैकान्यकिंयत्त
दः काले दा इति दा प्रत्ययः। सर्वस्य सो ऽन्यतरस्यामिति। सर्वशब्दस्य सकारादेशः॥
र्हिं यथा। तस्मिन्काले तर्हि। तयोर्दार्हिलौ ऽपूर्च्छंदसीति र्हिल्प्रत्ययः। अस्मिन्काले
एतर्हि। इदमो र्हिल्प्रत्ययः। एतेतौ रथोरिति इदम एत् इत्ययमादेशः। ह यथा॥ तत्र
अस्मिन्काले इह। इदमो ह इति ह प्रत्ययः इदम इभावः। कस्मिन्काले कुह वा ह च
छंदसि इति वा ह प्रत्ययः। कुतिहोरिति किमः कुरादेशः। अत् यथा। कस्मिन्काले
क। किमोत् इत्यत्। क्वाति किमः कादेशः। थाल् यथा। येन प्रकारेण यथा। एकेन था।

सर्वथा। प्रकारवचने था प्रत्ययः। थमुर्यथा। अनेन प्रकारेण इत्थं। इदमस्थमु तिति
थमुप्रत्ययः। एतेतौरथोर्ति ति इदमः इत्यादेशः। कः प्रकारः कथं। किमुश्चेति थमुः। कि
अ मः क इति कादेशः। अन्नातिर्यथा। पूर्वस्यां दिशि वसति पुरस्ताद्वसति। पूर्वस्यां दिश आ दे
गतः पुरस्तादागतः। पूर्वो देशो रमणीयः पुरस्ताद्रमणीयः। दिग्देशेभ्यः सप्तमी
२५ पंचमी प्रथमांतेभ्यो दिग्देशकालेषु स्तातिप्रत्ययः। पूर्वापराधराणामसिपुरव
स्त धश्चैषामिति पुरादेशः। द्युसस्यथा। समानस्य सभावो द्युस्च। सद्य इति निपात्यते। परु
त्परार्यैषमः परश्वावि:। पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरुभयेद्युरु
त्तरेद्यु रितिनिपात्यते। समानस्य सभावो द्युश्च प्रत्ययः। इत्यहन्यभिधेयेऽनयथा।

आरन्दयथा। पूर्व

स पूर्वस्मिन् संवत्सरे परुत्। पूर्वतरस्मिन् वर्षे। परारि। पूर्वतरयोः पर[illegible]वः। उत्आरि र्
ईर्ष्यैतौ प्रत्ययौ भवतः। संवत्सरे विधेये। समसिण् यथा। अस्मिन् संवत्सरे ऐषमः। इद
मः समसिणिति समसिण् प्रत्ययः। इदमः इश् भावः। तद्धितेष्वचामादेरिति वृद्धिः। आदि
एद्यविस् यथा। परस्मिन्नहनि परेद्यवि। परस्माद्यविस् इति एद्यविस् प्रत्ययः। यथा य
अस्मिन् काले अद्य। इदमो ऽद्यभावश्च विधिः। एद्युस् यथा। पूर्वस्मिन्नहनि पूर्वे
द्युः। अन्यस्मिन्नहनि अन्येद्युः। एवमपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। पूर्वान्यान्यत
राधरोभयोत्तरेभ्य एद्युस् प्रत्ययो भवति। अतसुच् यथा। दक्षिणस्मिन् देशे वसति
दक्षिणस्यां दिशि [illegible] दक्षिणे देशे रमणीयः। दक्षिणतो रमणीयः।

उत्तरस्मिन्देशे वसति। उत्तरस्माद्देशादागत इति। उत्तरतो वसति उत्तरत आगतः। उत्त
रो देशो रमणीयः। उत्तरतो रमणीयः। दक्षिणोत्तराभ्यामतसुच् इत्यतसुच्प्रत्ययः। [illegible]
आतिर्यथा। उत्तरस्मिन्देशे वसति उत्तराद्वसति। एवं दक्षिणाद्वसति उत्तराद्देशादागतः उ
त्तरादागतः। अधरादागतः। उत्तराधरदक्षिणादातिरित्यातिप्रत्ययः। [illegible]रिर्यथा। उ
र्ध्वे वसति उपरि वसति। रिष्टातिर्यथा। ऊर्ध्वे वसति उपरिष्टाद्वसति। उपर्युपरिष्टादि
त्यनेन निपात्यते। ऊर्ध्वशब्दस्य उपभावः रिरिष्टातिप्रत्ययो भवतः। एनपूर्वयथा। पूर्वदे
२ शो रमणीयः। एनबन्यतरस्यामदूरे पंचम्या इत्यनेनैनप्रत्ययः। आच्पूर्वयथा। दक्षिण
देशो रमणीयः। दक्षिणा रमणीयः। दक्षिणादाजित्याच्। आहिपूर्वयथा। दक्षिणस्यां
पूर्वदेशो रमणीयः
इत्यर्थः

दिशि ग्रामस्य दूरे वसति दक्षिणाहि। ग्रामाद्दूरस्ति भ्राहि च दूरे पं येम्ये त्याहि चू प्रत्ययः। धा यथा। कतिप्रकारः कतिधा। बहुप्रकारः बहुधा। एकप्रकारः एकधा। द्वौ प्रकारौ द्विधा। त्रयः प्रकाराः त्रिधा। संख्याया विधार्थे धा इति धाप्रत्ययः। ध्यमुञ् यथा॥ एकं वा कुरु एकध्यं कुरु। एकस्मा ध्यमुञ्चन्यतरस्यामिति ध्यमुञ्। धमुञ् यथा॥ द्विप्रकारः द्वैधं। त्रिप्रकारः त्रैधं। द्वित्र्योश्च धमुञिति गुणः एधाच्च यथा। द्विप्रकारः द्वेधा। त्रिप्रकारः त्रेधा। एधाच्चेति एधाच्प्रत्ययः। आम् यथा। चिरंतनमेव चिरंतरां। सुतरमेव सुतरां। अतितरमेव अतितरां। घादामु द्रव्यप्रकर्षे इत्याम् प्रत्ययः। स्व रूपव्ययार्थ्यस्तद्धितः समाप्तः॥ ॥भाववाचकस्तद्धितः कतमः। त्व। तल्

किमेमिङ घ्यं य ॥ उमाशप्तृयथा कुरुनेनपयः पयःस्याशं॥२

इमानिच् । ष्यञ् । यत् । य । ढक् । यक् । अञ् । अण् । वुञ् । इत्येकादशप्रत्ययाः । तद्यथा ।
तल्यथा पटोर्भावः पटुता । एवं मृदुता । तस्यभावस्त्वतलावितित्वतलप्रत्ययः । इमानिच्यथा । पृथोर्भा
वः प्रथिमा । एवं म्रदिमा । लघोर्भावः लघिमा । गुरोर्भावः गरिमा । साधोर्भावः साधि
मा । एवं पटोर्भावः पटिमा । अणोर्भावः अणिमा । तनोर्भावस्तनिमा । स्थूलभावः स्थ
२६ विमा । महतोर्भावः महिमा । प्रियस्यभावः प्रेमा । ह्रस्वस्यभावः ह्रसिमा । क्षिप्रस्यभावः
२ क्षेपिमा । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्यगुणः । बहुलस्यभावः बं
हिमा । दीर्घस्यभावः द्राघिमा । बलोर्भावः वलिमा । श्वेतस्यभावः श्वेतिमा । दृढस्यभा
वः द्रढिमा । कृशस्यभावः क्रशिमा । पृथ्वादिभ्यइमनिच्वेतिइमनिच्प्रत्ययः । ष्यञ्यथा ।

श्वेतस्य भावः श्वैत्यं । दृढस्य भावः दार्ढ्यं । सुभगस्य भावः सौभाग्यं । वर्णदृढादिभ्यः ष्य
ञ् इति ष्यञ् । हृद्भगसिन्ध्वन्ते पूर्वपदस्य च इत्युभयपदस्य वृद्धिः । यत् यथा । स्तेनस्य
भावः स्तेयं । स्तेनान्नलोपश्चेति यत् । यो यथा । सख्युर्भावः सख्यं । सख्युर्य इति यः । ढक्
यथा । कपेर्भावः कापेयं । ज्ञातेर्भावः ज्ञातेयं । कपिज्ञात्योर्ढगिति ढक् प्रत्ययः । ढक् लोपश्च ।
९ या आयनादिसूत्रेण [illegible] देशः । यक् यथा । बृहस्पतेर्भावः बार्हस्पत्यं । सेनापतेर्भावः सैना
पत्यं । प्रजापतेर्भावः प्राजापत्यं । पुरोहितस्य भावः पौरोहित्यं । पत्यन्तपुरोहितादिभ्यो
यगिति यक् । अण् यथा । ऋष्यस्य भावः आर्ष्यं । उष्ट्रस्य भावः औष्ट्रं । कुमारस्य भावः कौ
मारं । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् इति अण् यथा । त्रिहायनस्य भावः त्रै

त। आतां। झ। थास्। आतां। ध्वं। इ वहि महिङ्।।५

हायनं। द्विहायनस्य भावः द्वैहायनं। चतुर्हायनस्य भावश्चातुर्हायनं। यूनो भावः यौवनं। स्थ
विरस्य भावः स्थाविरं। हायनांतयुवादिभ्योऽणित्यण्। पृथोर्भावः पार्थवं। मृदोर्भावः मार्द
च वं। गुरोर्भावः गौरवं। इगंताच्च लघुपूर्वादित्यण्। वुञ् यथा। रमणीयस्य भावो रामणीयकं।
वसनीयस्य भावो वासनीयकं। आचार्यस्य भावश्चाचार्यकं। योपधाद्गुरूपोत्तमाद्वुञिति वु
२७ ञ्। इति प्रयोगविवेके द्वितीयः पटलः।। ।।एवं तद्धितप्रयोगमनूद्य तिङ्प्रयोगा अभि
धानमनुष्ठास्यामहे इति कतमः। तिप्। तस्। अंति। सिप्। थस्। थ। मिप्। वस्। मस्। ते। आते। प
तिङ् अंते। से। आथे। ध्वे। ए। वहे। महे। इत्यष्टादश धातोर्विदितव्याः।। तत्र तिङ् [illegible] दश धातुसंज्ञा।
प्रत्ययसंज्ञा।। विभक्तिसंज्ञा। परस्मैपदसंज्ञा। आत्मनेपदसंज्ञा। प्रथमपुरुषसंज्ञा। मध्यमपुरु
उत्तिङ् वचनवपूर्वोर्ध्व लादेशाचपरो द्विधा।। परस्मैपदमाख्यातं तङानावात्मनेपदं ३।२ समुहे २।।

तिङ् तिङ्

पत्र २।१ स्मर२५ १ प्रयोग

षसंज्ञा। उत्तमपुरुषसंज्ञा। एकवचनसंज्ञा। द्विवचनसंज्ञा। बहुवचनसंज्ञा। केषां प्रत्ययसंज्ञा।
स्याच्चेषामष्टादशानां तिङ्प्रत्ययसंज्ञा। तेषामेव विभक्तिसंज्ञा। परस्मैपदादिसंज्ञा। तिङ्
वचनवपूर्व ईत्नादेशावपरौ द्विविधा। परस्मैपदम् आख्यातमिति। अस्यार्थः। तितसझंती
त्यादि। तिङ्वचनवपूर्वाणि। योऽच्चह्वावपरौ त्वादेशौ शानृहरनू कसुसंसकौ विध्यक्वादशप
ना रस्मैपदमुक्तं। कृतमदात्मनेपदं। तिङ्आत्मनेपदमिति। अस्यार्थः। तङ्। चू। आनच। ति
मे ङ्तङ्गि ति। ते। आते। अन्ते। इति प्रत्याहाराः। तिङ्इत्यनेन तिङ्मुत्तराणि वचनानि गृ
ह्यन्ते। आन् इति शानच्कानचोः कृत् ऋष्यानुबंधयोः ग्रहणं। एवमात्मनेपदमध्ये एका
दशाधा विज्ञेयोति। परस्मैपात्मनेभागवचनानि त्रिधा त्रिधा त्रयः पुरुषा ज्ञेयाः।

प्रथममध्यमोत्तमाः ॥ अयमर्थः । उभयपक्षेपि प्रथममध्यमोत्तमाः पुरुषाः ज्ञेयाः ॥ परस्मै
पदपक्षे आत्मनेपदपक्षे च । तेषां परस्मैपदात्मनेपदसंज्ञकानां त्रीणि त्रीणि वचनानि
प्रथममध्यमोत्तमपुरुषसंज्ञानि भवंति । परस्मैपदभागे तावत् । ति । तस् । अंति प्रथमः ।
एवमात्मनेपदभागे वेदितव्यं । एकद्विबहुसंज्ञानि पदान्येकैकशः तिङामिति । कोर्थः ॥
यानि तिङां पदानि तान्येकैकशः एकवचनद्विवचनबहुवचनसंज्ञानि भवंति । ति इत्येकव
२८ चनं । तस् इति द्विवचनं । अंती इति बहुवचनं । एवमन्येष्वपि वेदितव्यं । परस्मै कर्तरि ज्ञे
यं न भावे नापि कर्मणीति । कोर्थः । परस्मैपदं कर्तर्येव प्रयोक्तव्यं । न भावकर्मणोरिति ।
ननु च यदि परस्मैपदं कर्तर्येव प्रयोक्तव्यं तर्हि कथं लोके पच्यते । क्रियते पुरुषाभ्या
रोनानुवर्तंति ताभ्यामिति क्रियत इति । नेदं परस्मैपदं किं तर्हि आत्मनेपदं । अपि तु

प   शषसरूपं   १ च्यति

तिङ्स्वेव्ययेनैव । तङः लच्छास्त्रकारप्रामाण्यादात्मनेपदस्यानेपरस्मैपदं कर्तव्यं । तस्मा
त्सत्यपि परस्मैपदे आत्मनेपदं ज्ञातव्यं । आत्मनेत्रिषु चिह्नेयं भावे कर्तरि कर्मणि । अत्र वक्तव्यं ।
आत्मनेपदं भावे कर्तरि कर्मणि भवतीत्युक्ते । किंतर्हि सर्वेभ्यो धातुभ्यो नापि सर्वे प्रथममध्य
मोत्तमा भवंति । नापि सर्वाणि वचनानि । किंतर्हि धातोरकर्मकाद्भावे प्रथमैकवचनं तथेति ।
मपुरु भावे अकर्मकादेव धातोरात्मनेपदं प्रथमैकवचनमेव भवति । यथास्थीयते देवदत्तेन न कदाचि
त्स्थीयेते । आस्थीयंते इति वा प्रयुज्यते । सकर्मकाकर्मकाद्धातोः कर्तरि स्मृतमात्मने । अस्य
यमभिप्रायः । यदात्मनेपदं कर्तरि वर्तते तदा सर्वस्मादेव भवतीति सकर्मकाकर्मकाच्चेति
ते सकर्मकात्तावौ । कटं कुरुते देवदत्तः । स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यात्मनेपदं ।
अकर्मकात् शेते देवदत्तः । अनुदात्तङित आत्मनेपदं । यत्कर्मणि तु नि हिर्षि वर्तते तत्सकर्म

ऽर्थः। यत्पुनरात्मनेपदं कर्मणि तु वक्ष्यंते तत्सकर्मकादेव धातोर्भवति नाकर्मकात्। यथा।
कटः क्रियते राजपुत्रेण। आत्मनेपदानि भावकर्मणोरित्यात्मनेपदं। सार्वधातुके यगिति यक्।
तिङ्‌। शाप्‌। ङ। णिङ्‌। द्वितित्तिङ्‌ भावः प्रथमपुरुषः केनसह नियोक्तव्यः इत्याह। नाम्नैव सह
नियोक्तव्यः प्रथमः पुरुषो भवेदिति। अयमर्थः। नामपदैरेव भवद्भिः प्रथमः पुरुषः प्रयुज्यते।
न च युष्मदस्मदपदाभ्यां। यथा जयति ब्राह्मणः। जयतो ब्राह्मणौ। जयंति ब्राह्मणाः। मध्यमः
पुरुषः केन सह प्रयुज्यते। युष्मदपदैरेव न नामपदैः। किं सर्वविभक्त्यंतैर्युष्मदि मध्यमः प्र न्य
युज्यते। तत्प्रति विधत्ते। त्वं युवां यूयमित्येभिस्त्रिभिरेव तु मध्यम इति। यथा त्वं जयसि। यु
वां जयथः। यूयं जयथ। उत्तमस्तु केन सह प्रयुज्यते अत आह। अहमावां वयं त्वेभिरुत्तमो ना
न्यथा मत इति। एतदुक्तं भवति। उत्तमोपि न नामपदेन सह युज्यते। न च युष्मदपदेन। किंतर्हि अस्म
त्पदे। न

यथा अहं जयामि। आवां जयावः। वयं जयामः। इति किमेकोत्तेनोत्तमः पुरुषो नान्यथा प्रयुज्यते।
अत आह। अन्यत्र प्रहासे स्यादिति तत्किमिति मध्यमपुरुषस्थाने उत्तमपुरुषप्रयोगः कृतः।
स चायं प्रयोगः प्रहासे कृतः। नान्यत्र। उक्तं तिङ्स्वरूपमात्रं। तिङ्प्रयोगस्तु च तत्किं चिद्ध
स्तेरेण प्रदृश्यते। अस्ति कश्चित्तिङ्प्रयोगः। यस्य यस्य प्रयोगः। कदाचित्तस्य कर्मणि प्रय
मो यथा वृक्षश्छिद्यते तक्षकेन। आत्मनेपदं [illegible]। भावकर्मणोरात्मनेपदं कदाचिद्द्विती
या स्यात्। यथा वृक्षं छिनत्ति तक्षकः। कदाचित्षष्ठी स्यादिति। यथा वृक्षस्य रुजति रोगः।
रुजार्थानां भाववचनानामज्वरेरिति षष्ठी। यथा शत्रून् नृपिनष्टि राजा जासिनिप्रहण
नाट क्राथ पिषां हिंसायामिति षष्ठी। कदाचित् चतुर्थी स्यात्। यथा ग्रामाय व्रजति पु
रुषः। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ। द्विकर्मकोपि ज्ञेयप्रयोगो ज्ञेयः। पुनः किंचिद्विशे

यस्माद्द्विषमो हि तिङ्प्रयोगे । द्विकर्मणि जं तरवः । तस्मा द्विकर्मणि जं तं दर्शयिष्यामः । णिजं
तेभ्यो धातुभ्यः कर्मविवक्षायां कर्मण्यभिधेये द्विकर्मणी अभिधीयते । प्रधानं प्रधानं चेति । त
च्चकिंचित्तिङं तेन प्रयोगेन कर्माभिधीयते । तत्प्रधानमिति । अतो भाष्यकारमेवाह । प्रधान
व कर्मण्याख्येये ण्यादीनां द्विकर्मकाणां अप्रधाने दुहादीनां ण्यंतेकर्तुश्च कर्मण इति कोर्थः । द्वि
कर्मकेषु धातुषु कर्मणि कर्मविवक्षायां तिपा प्रधानं कर्माभिधीयते । अभिहितत्वाच्च कर्मणः
30 प्रथमैव भवति । अप्रधाने पुनरभिहितत्वाद्द्वितीया भवति । कर्तर्यनभिहिते तृतीया भवति । कि
मुदाहरणं नीयते अजा देवदत्तेन ग्रामं उह्यते अजा देवदत्तेन ग्रामं । आकृष्यते गोगोपालके
न व्रजं । अप्रधाने दुहादीनामिति कोर्थः । दुहादीनां धातूनां प्रयोगे कर्मणि विवक्षायां प्रधानं
कर्माभिधीयते । तिङ्पदेन के पुनर्दुहादयः इति । दुहि याचि रुधि प्रच्छि भिक्षि चिञाम् उपयोगनिमित्ते

याचि चि अ म

निवह्याहृते श्चैवगत्यर्थानां तथैवच॥ द्विकर्मकेषु ग्रहणं ण्यंते कर्तुश्च कर्मणः॥ कालाध्वगमनातथा कर्मसंज्ञा द्विक

र्मुविशा सिष्येण न चयत्सचते तदकीर्तितमाचरितं कविनां। याच्यते राजा कंबलं ब्राह्मणेन।

कं धियथा॥ रुध्यते गौर्देवदत्तेन व्रजं। प्रच्छियथा। पृच्छ्यते भिक्षुको ब्राह्मणेन। याज्ञादीनां

संप्रसारणं। भिक्षियथा। भिक्षते गोपालको मानैवकं नक्षीराणि। चिञ्‌यथा। चीयते वृ

क्षा विष्णु मित्रेण फलानि। अकृत्सार्वधातुकयो रितिदीर्घः। ब्रूञ्‌यथा। उच्यते यजमा

नो धर्ममृषिणा। ब्रुवो वचि रितिवचिरादेशः। शासियथा। शिष्यते शास्त्राणि शिष्यो गु

रुणा। शास इदुपधायां अ एच्च्यंजनयो रितिअकारस्येकारः। ण्यंते कर्तुश्च कर्मणइ

तिकोर्थः। ण्यंतेभ्यो धातुभ्यो गत्यर्थादिभ्याय: कर्ता कर्मभूतः सएवाभिधीयते। किमु

दाहरणं। गच्छति भृत्यो ग्रामं। गम्यते भृत्यो राज्ञा ग्रामं। बुध्यते शास्त्रं शिष्येण गुरुणा। भुंक्ते

ब्राह्मणो भोजनं। भोज्यते ब्राह्मणो भोजनं देवदत्तेन। पठति माणवकः शास्त्रं। पठ्यते

॥६०॥ २९

मानवकः शास्त्रमुपाध्यायेन। आस्ते आसनेऽतिथिः। आस्यतेऽतिथिरासने नागरेण। कर्तुः कर्मसंज्ञायां नी वह्योः प्रतिषेधो वक्तव्यः। कः प्रतिषेधः। गतिबुद्धीत्यादीना नीवह्योर ण्यन्तयोर्यः कर्त्ता स णौ अपि सति कर्मसंज्ञो मा भूत्। किमुदाहरणं। देवदत्तो नयति गां ग्रामं। नाय यति देवदत्तो ग्रामं गां यज्ञदत्तेन। कर्तर्यभिहिते कर्मणि पुनरभिहिते। नाय्यते गौर्ग्रामं देवदत्तेन यज्ञदत्तेन खादतिर्वा समन्वः। खादयत्यासेऽन्नं देवदत्तेन। वहति भारं देवदत्तो ग्रामं। वाह्यते भारो देवदत्तेन यज्ञदत्तेन ग्रामं। सर्वत्र प्रपयसा न वर्त्मनि कस्य प्रतिषेधो वक्तव्यः। यत्किंचित्कार्यं निर्दिष्टं तदादेश्यार्थं तत्रैव कर्मकर्ता तस्य सर्वस्मिन्नुविधौ कर्मसंज्ञा मा भूत्। णिजन्तस्या देर्ण्यर्थत्वान्निगरण चलनार्थेभ्यश्चेत्यनेन सूत्रेण परस्मैपदं प्राप्तमनया उच्या आदयतीति मा भूत्। गतिबुद्धिरत्या दिनायः कर्त्ता पूर्वस्तस्य कर्मसंज्ञा मा भूत्। किमुदाहरणं। अत्ति देवदत्तः पायसं। आदयते देवदत्तः पा

प्रत्यवसानार्थे उ

31

यसंयस्तदत्तः। तस्य कर्मसंज्ञाप्रतिषेध इति। यदि तु एषि न स्ति तदैवं प्रयोगो भविष्यति। आदयति देवदत्तं
पायसं यज्ञदत्तः। अक स्येति किमर्थं इदमेषां जग्धं। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य
इति क्तप्रत्ययः। अदो जग्धिर्ल्यप्ति किति इति जग्धिरादेशः। अत्र षष्ठीप्रतिषेधो मा भूत्। यद्यकस्येति
पर्युदासो न क्रियेत तदाधिकरणवाचिना क्तप्रत्ययेन क्तप्रत्ययप्रयोगे षष्ठी न स्यात्। भक्षेरहिंसा
यां। भक्षेर्ध्यतिरहिंसाय। मध्येकर्तुः कर्मसंज्ञाप्रतिषेधो वक्तव्यः। भक्षयति पिण्डं देवदत्त इति। अयं णि
च पूर्वं च चुरादिलक्षणः न पुनर्हेतुमति चेत्यनेन णिच् विधीयते। हेतुलक्षणे णिचि विधीयमाने। एवं
प्रयोगः स्यात्। भक्षयति पिण्डं देवदत्तेन यज्ञदत्तः। अहिंसायामिति किं। भक्षयति बलीवर्दं सस्यं य
ज्ञदत्तः। न कर्मसंज्ञाप्रतिषेधः। वहेरनियन्तृके कर्तरि। वहथालारनियन्तृकर्तृकस्य ण्यन्तस्य यः कर्ता
तस्य ण्यन्तस्य पुनः कर्मसंज्ञाप्रतिषेधो वक्तव्यः। वाहयति बलीवर्दं भारं वाहयति बलीवर्देन भारं य

इदन्तः । अनियं हृकस्येति किं । वहंति बलीवर्द्दभारं । वाहयंति बलीवर्द्दान् भारं सारथिकाः । बली
वर्द्देषु भारं नीयमाना इत्यर्थः । उक्तोयं तिङ्प्रयोग एव संक्षेपात् ॥ ॥ तिङ्प्रयोगं विधाय संप्रति कृ
त्प्रयोगमवसरप्राप्तं [illegible] वक्ष्यामः । कृतस्त्रिष्वपि भवंति । तथा कृत्प्रत्ययेष्वपि भावकर्मकर्तृषु
प्रयोगे भवंतीति । के प्रत्यया भावे भवंति । अतआह । अजप्क्तिन् [illegible] भावेषु जयाराद्यु एव तो । [illegible]
37 अ अच् अप् क्तिन् [illegible] घञ् युच् [illegible] इत्येते अजादयाः प्रत्ययाः ते भावे भवंति न कर्मणि
नापि कर्त्तरि ॥ अच् यथा । पुष्पाणां चयः । धर्मस्य चयः । एवं निचयनं निचयः । जयनं जयः । चिक्रय
णं चिक्रयः ~~जयनं जयः~~ । प्रपयांत ह्रस्वः । पूर्वे अच् । प्रत्ययांत पुंसि रूपमुपलक्षितव्यं । नास्त्रियं न
र नपुंसके । अजिस्य प्रत्ययः । अप्प्रत्ययप्रयोगो यथा । शराणां निकरः । एवं दरः । परः । स्वरः । लवः । चरः । स
उपह प्रभवः । प्रयवः । उपद्रवः । अपन्हवः । उपस्तवः । प्लवः । प्रणव इत्यादि । [illegible]रपीत्यं पतिग्रहः । चरः । आदरः
ज्वरः चरः [illegible] उपस्तवः

निश्चयः।आगमः।ग्रह वृ दृ निश्चिगमश्चेत्यप्।अपप्रत्ययांताः सर्वे पुंसि।ण्वुल् यथा।ओदनस्य पच ल्यु
नं।पचनं च।शवणं।गरणं।अशनं।वाशनं।यानं।पानं।शोभनं।ग्लानं।ण्वुल् इति ण्वुल्।करणाधिक ल्यु
रणयोश्चेति।ण्वुल् प्र[illegible]योपधा।पुनात्यनेनेति पवनं।बिभर्त्यनेनेति बिभरणं।श्रृणो।त्यस्मिन्निति
श्रवणं।छिनत्यस्मिन्निति छिन्नणं।वृणोत्यस्मिन्निति वरणं।इत्यधिकरणे।क्तिं यथा।पुण्यस्य कृतिः।
कर्तृकर्मणोः कृतीति कृद्योगे षष्ठी।भोजनं भुक्तिः।देवदत्तस्य भुक्तिः।एवं गतिः।भक्तिः।स्तुतिः।
बोधनं बुद्धिः।सेधनं सिद्धिः।भेदनं भित्तिः।छेदनं छित्तिः।उदयनं उदयातिः।ऋद्धिः।वृत्तिः।प्राप्ति
ति: रित्येवमादि।स्त्रियां क्तिन्।ऊदींर्वमहीति।स्था।गा।पा।पचो भावे क्तिन्।घुमास्थागापाज
हातिसां हलीति ईत्वं।पच्यते यथा।ओदनस्य पाकः।एवं रंजनं रागः।नादः।भावः।भेदः।छेदः।भा
वेचेति घञ्।रोगः।स्पर्शः।पादः।वेशः।पदरुजविशस्पृशो घञिति घञ्।सारः स्थिर इति घञ्।

संद: भंग: यंथ: इत्येवमादिभावेप्रत्ययेचिनिवन् ॥ मुञ्च यथा। कारणा। हरणा। मरणा। एवं वेदना। छेदना। वेदना। भावना। शोषणा। शोभना इत्येवमादि ॥ ण्प्रा सन्नंतधातुभ्योऽचितिकुच् ॥ अकार प्रत्ययो यथा। पठस्य चिकीर्षा। एवं जिहीर्षा। जिगमिषा। चिकित्सा। विजिगीषा। जिघांसा। बुभुक्षा। तितिक्षा। जिज्ञासा। अप्रत्ययादिसे प्रत्ययः। चेष्टागुरोश्च हलन्तस्य अप्रत्ययः। अद्यथा। उपधा। अभिसन्धा। आत्मश्चोपसर्ग इत्यङ् । भावना। भिक्षा। लक्ष्मी। निद्रा। छिदा। राजा। तृषा। इत्यादि। भिदादिभ्योऽङ् प्रत्ययः। क्रुधशौ इ: गुण इत्युण: । शायथा। क्रिया। इच्छ: शञ्चरति शञ्चप्रत्ययः। रिङ्‌ शयङ् लिङ्‌ क्षितिरित्युक्तः ॥ उक्ताः केवलं भाववाचिनः। मिश्रवाचकाः। कृत्प्रत्यय उच्यते। कृतभोऽस्मि भवाच्यकाः। कृत्प्रत्यया: सकर्मकाकर्मधातोः कर्मभावयोरिति। अयमर्थः। यदा कृत्प्रत्ययः सकर्मकेभ्यो धातुभ्यो भवति। तदा कर्मण्येव वर्तते। यदाकर्मकेभ्यो धातुभ्यो भवति तदा भावे वर्तते न कर्तरीति।

सप्त। यदा क्तो भावे वर्त्तते तदा तस्य कर्त्तुः का विभक्तिरुपादीयते। षष्ठी देवदत्तस्य भुक्तमिति नपुंसके भा
वे क्त इति क्तप्रत्ययः। सकर्मके यथा। देवदत्तस्य गतमिति क्तस्य वर्त्तमाने इति षष्ठी। अनुदात्तोपदे शेना
नुना सिकलोपः। लिङीति तिमलोपः। तृतीया या कदाचिद्दृश्यते। यथा देवदत्तेन गतमिति। कर्त्तृकरण
योश्चेति तृतीया। यदा पुनः क्तः कर्मणि वर्त्तते तदा तस्य कर्मणि प्रथमा। तस्य कर्त्तरि तृतीयैव
नान्यथा विभक्तिरुपादीयते। देवदत्तेन अवनी रक्षा प्यानिषात्ता नपूर्वस्य चद इति निषात नकारस्य न
त्वं। कृत्याः पुनः क्व वर्त्तन्ते तन्नाह। कृत्य क्त खलर्थाश्च तयोरेवानुवर्त्तिता इति। अयमर्थः। तयोरेव भाव
कर्मणोः कृत्याश्च खलर्थाश्च प्रत्यया भवंति न च कर्त्तरि। अकर्मकेभ्यो धातुभ्यो भावे भवंति। के पुनः
तव्य कृत्यप्रत्ययाः। अत आह। तव्या अनीयर। ण्यप्। ण्यत्। खलर्थ एव चायुच्[illegible]। त्या क्यपो कृत्यसंज्ञाः य २
प्रकीर्तिताः। इति। तव्यस्तावत्। भोक्तव्य ओदनो देवदत्तेन। देवदत्तस्य तितया। कृत्यानां कर्त्तरि चेति षष्ठी। (

तयोरेव कृत्य खलर्थाः[illegible] कर्मणि भवंति न कर्त्तरि ३

यदा षष्ठीन भवति तदा न भिहिते कर्त्तरि तृतीया स्यात् । तद्यथा । कर्त्तव्यः । हर्त्तव्यः । सेवितव्यः । उपासि
तव्यः । भवितव्यः । हसितव्यः । वहितव्यं । गंतव्यं । कर्त्तव्यं । होतव्यं । ज्ञातव्यं । बोद्धव्यं । यष्टव्यं । वर्त्ति
व्यं । प्रहेतव्यं । चोरयितव्यमित्यादि । यथा तव्य[redacted]पं । तथा तव्यैः [redacted] रूपं । केवलं [illegible] स्वरभेदः । अनीय
तद्यथा । देवदत्तेन करणीयो धर्मः । स्पृहणीयं रूपं । रंजनीयमित्यादि । तव्यतव्यानीयरस्ते प्रत्य
२ या भवंति । क्त्वा । कृ । प्रकृत[redacted] इति कृत्यसंज्ञा । यत् यथा । पेयमुदकं देवदत्तेन । देवदत्तस्य वा । द
यं द्रव्यं । गेयं । नेयं । ज्ञेयं इत्यादि । अचो यत् दिस्यत् । ईद्यतीति इकारः । क्यप् यथा । स्तुत्यो ग्रामो देव
34 दत्तेन । स्तुत्यो देवः । शिष्यो बालः । इत्यः । आदृत्यः । जुष्यः । एतिस्तुशास्वृदृजुषः क्यप् । ह्रस्वस्य
पितिकृति तुक् । कृत्यं वृष्यः । विभाषा कृवृषोरिति क्यप् । पूं । पुंन्मभांक्षसंतायां इति क्यप् । ण्यत्
यथा । कार्यो धर्मः । पुरुषेण पुरुषस्य वा । एवं भेद्यं । छेद्यं । भोज्यं । भोग्यं । पाच्यं । वाच्यं । त्याज्यमित्यादि ।

२ कृत्यः भन्यः २

त्मद्दलोपर्वदितिणपत् ।खलयथा ।कृच्छ्रेणक्रियतेईषत्करः ।कटोदेवदत्तेनदुष्करः ।कटःसुखेनक्रियते ।
सुकरःपरमकृच्छ्रेणलभ्यते ।सुलभःकृच्छ्रेणतीर्यते ।ईषत्तरः ।अकृच्छ्रेणतीर्यतेसुतरः ।अकृच्छ्रेणग
म्यतेसुगमः ।कृच्छ्रेणईषद्बोधः ।अकृच्छ्रेणबुध्यतेसुबोधः ।ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल्प्रत्ययः ।
कर्तृकर्मणोःकृतिनित्यंषष्ठी प्राप्ता ।नलोकाव्ययनिष्ठाखलर्थतृणामितिप्रतिषिध्यते ।पुनर्यथा ।
दी कृच्छ्रेणदीयतेदुर्दानं ।अकृच्छ्रेणदीयतेसुदानं ।अकृच्छ्रेणपीयतेसुपानं ।आतोयुजितियुच् ।कस्मा
त्ययउच्यते ।किंभावकर्मणोरेववर्तते ।आहोस्विन्नेति ।अतआह ।त्रिषुगत्यर्थकादिभ्यस्तत्रचैवा
दिकर्मणीति ।कोर्थः ।कृत्प्रत्ययोगत्यर्थकादिभ्योधातुभ्योवर्तते ।यश्चादिकर्मणिविहितःसत्रिषु
भावकर्मकर्तृषुवर्तते ।केपुनर्गत्यर्थाः ।गत्यर्थाकर्मकश्लिषशीङ्स्थाआस्वसजनरुहजीर्यतिभ्यश्चे मुरु
तिगत्यर्थाः ।तेभ्यएवकृत्प्रत्ययोभवति त्रिष्वपिसाधनेषुभवति ।किमुदाहरणं कर्मणितावत् ॥

अ वस्र ३२

निष्ठायाः किदान्गुणः कर्त्तरि गुरुमधिशयितोयं भावेऽधिशयितमनेन ।५

ग्राम गतो देवदत्तेन ग्रामः । कर्त्तरि पुनः । गतो देवदत्तः । भावे पुनः देवदत्तेन गतमिति । न्यादयस्तु पुनरकर्म
काः अपि सोपसर्गकाः सकर्मका भवंति । अकर्मकेभ्यो धातुभ्यः किमुदाहरणं । कर्मणि तावत् । अ
नुशुष्कः सूर्येण रुद्रः । कर्त्तरि [illegible] । रुद्रमनुशुष्कः सूर्यः । भावे पुनः । अनुशुष्कं सूर्येण । शुषः क ५:
इति निष्ठातकारस्य ककारादेशः । श्लिष यथा । आश्लिष्टा कन्या देवदत्तेनेति कर्मणि । कन्यामा
श्लिष्टो देवदत्त इति कर्त्तरि । आश्लिष्टं भवतीति भावे । शीङ् यथा । अधिशयितो गुरुर्देवदत्तेनं ।
स्थि स्था यथा । उप[illegible]तो गुरुर्देवदत्तेन । इति कर्मणि (द्यतिस्यति) मास्थामित्तिकितीति इत्त्वमा
कारस्य । कर्त्तरि यथा । उपस्थि[illegible]तो गुरुं शिष्यः । उपस्थितं देववदत्तेनेति भावे । आस यथा । उपा
35 सितो गुरुर्देवदत्तेन इति कर्मणि । उपासितो गुरुं देवदत्त इति कर्त्तरि । उपासितं देवदत्तेनेति भावे । व
स यथा । अनुषितो गुरुर्देवदत्तेन । वसतिक्षुधोरिडिति इडागमः इति कर्मणि । अनुषितो देवदत्तो गुरुं ।

तः

२ इति भावे॥ रुह यथा आरूढो वानरो वृक्षं इति कर्त्तरि। वानरेण आरूढो वृक्षः इति कर्मणि।
इति कर्त्तरि। अभ्युषितं देवदत्तेनेति भावे। वचिस्वपियजादीनां किति संप्रसारणं। संप्रसारणाच्चेति
पूर्वरूपत्वं। जनि यथा। उपजनितः पुत्रो देवदत्तेनेति कर्मणि। उपजनितः पुत्रं देवदत्त इति कर्त्तरि।
ज उपजनितं। आरूढं देवदत्तेनेति भावे॥ हो ढ इति हकारस्य ढकारः। झषस्तथोर्धोऽध इति धत्वं। ष्टुप
ष्टु तवर्गस्य [illegible] त्वं। ढो ढे लोपः। दीर्घश्च। पथायाइति ढलोपे दीर्घश्च। जॄष यथा। अन्वयैरप जीर्णो
लो देवदत्तेनेति कर्मणि। वृषमपजीर्णो देवदत्तः कर्त्तरि। अन्वपजीर्णं देवदत्तेनेति भावे। ऋत इद्
धातोः इति ऋकार इत्वं। र्वोरुपधाया दीर्घ इति दीर्घत्वं। रदाभ्यां निष्ठातो नः पूर्वस्य च इति नत्वं।
कथमादिकर्मणि क्तप्रत्ययः कर्मकर्तृभावेषु वर्त्तते। यथा भुक्तमोदनं देवदत्तः कर्त्तरि। भुक्तमने
नेति भावे। अकर्मकात् समुत्पन्नो वर्त्तते कर्तृभावयोः। कोर्थः। यदा क्तप्रत्ययः अकर्मकेभ्यो धातु
भ्यः समुत्पद्यते तदा [illegible] कर्त्तरि यथा। ग्रामादिस्थानदी॥

भावेक्तुंतथा: ।क्तः क्तवतुस्य: ।कर्त्तर्येववर्त्ततेनभावेनापिनापिकर्मणि ।इष्णुच् ।क्वतु ।विच् ।तृण् ।
क्विप् कसच् ।पाकन् ।णिनि ।अच् ।उ ।अण् ।उकञ् ।कैस् ।ट ।कट् इत्यादा: ।।कर्त्तरि इष्णुच् ।तावत् पु
ना त्रमलंकरिष्णु: ।अलंकरणधर्मा ।साधुमलंकरोति ।अलंकर्मैं जनोत्पन्ने ।न्यद इति इष्णुच् ।क्त
वतुर्यथा ।ग्रामंगतवान्देवदत्तः ।म्मतइत्यधिकृत्यनिष्ठाप्रत्यय: ।क्तानिष्ठाउक्ष्तानिष्ठा ।नलो
काव्ययनिष्ठा ।खलर्थतृणामितिप्रतिषेध: ।यथादेवदत्तस्यउपयुक्ते ।उपयुक्तेदेवदत्तः ।विचयथा ।
न्उपे पुंसेवंदासइतिच ।विच् ।तृण् यथा ।कटंकरोतीतिकरकर्त्तादेवदत्तः ।अत्रकर्मणिषष्ठीकस्मान्न
भवति ।तृणितिप्रतिषेधात् ।नलोकाव्ययनिष्ठाखलर्थतृणामितिसूत्रेणेन ।आधेत्तस्वीलतद्धर्म र्थ
३० तत्साधुकारिष्विति तृण् ।क्विप् यथा ।काष्ठस्याभिदेवदत्तः ।सत्सूद्विषद्यादिना क्विप् ।कसच् यथा ।
ओदनस्यपक्तिकोदेवदत्तः ।भृद्य: ।स्वय ।द: ।कारिरजितिकारश्च ।पाकन्यथा ।ओदनस्यपिक्षाकः ।

समरः स्मरः घस्मरः
स्मरः

जल्पभिक्षकुट्टलुंटवृंभ्यः षाकन् । ष्युयथा । पुत्रानंदनो देवदत्तः । अच्यथा । नंदिग्र[illegible]दिभ्यो ल्युः

ण्यच ॥ णिनियथा । शब्दग्राही देवदत्तः । तेनैव णिनिप्रत्ययः ॥ अच्यथा । ओदनस्य पचेत्तो नै

वमच । अकारोयथा । कर्तुंचिकीर्षुर्देवदत्तः । सनाशंसभिक्षुपि तिउप्रत्ययः । अतोलोपइ यकारलोपः ।

अण्यथा । कुम्भंकरोतीति कुंभकारः । कर्मण्यणीत्यण् । कर्तृकर्मणोः कृतीति षष्ठी । उपपदमा ते

ङितिसमासः । उकञ्यथा । ग्रामेका मुके देवदत्तः । खेवक्षतेपदस्याभूवृषहनकमगमशॄभ्यउक

ञ् । उकञ्प्रत्ययः । टक्यथा । सीधुंपिबतीति सीधुपः । सामंगायतीति सामगः । गापोष्टगिति टक्

टक्यथा । गिरौ चरतीति गिरिश्चरः । चरेष्टरिति टः । कः यथा । पुत्रस्य प्रियो देवदत्तः । शास्त्रस्य प्रियःपु

रुषः । पर्णस्य क्षिपो वायुः । इगुपधज्ञाप्रीकिरः क इति कः । अथास्य पुमुनः कप्रत्यया वर्तन्ते । क

तन्नाह । भावेनान्तरस्य ... पुमुनः ... ॥ ... प्रत्ययाः प्रवर्तन्ते ॥

पूर्वक ।

३८

क्त्वातुमुन् ५ ३ ग्य

पूर्वकालिकाः सोन्तरकामभावे च वर्तते। न कर्मणि च पकर्तरि कर्मणि प्रथमा तेषामिति कोर्थः। तेषां त्य
प्तुमुन् क्त्वाप्रत्ययानां कर्मणि प्रथमा विधीयते। त्यपस्तावत्। कटः प्रकृत्य स्थीयते देवदत्तेन। समानक
र्तृकयोः पूर्वकाल इति क्त्वा। समासेऽनञ्पूर्वे क्त्वो ल्यप् आदेशः। ह्रस्वस्य पिति कृति तुगिति तुमागमः। उप
पदमतिङ् इति समासः। क्त्वातुमुन् कसुन् इत्यव्ययसंज्ञा। अव्ययादाप्सुप इति सुपो लुक्। क्तसुन्
(यथा) पुरा सूर्यस्योद (यिता राधेयं) तुमुन् यथा। ग्रामो गन्तुमिष्यते देवदत्तेन। तुमुण्वुलौ क्रियायां क्रियार्थायामिति तुमुन्। क्त्वाप्रत्ययो यथा। कटं कर्तुमिष्यते राजा। ल्यप्तुमुन्क्त्वाप्रत्ययानां कर्मणि प्र
३१ थमैव विभक्तिरेका विधातव्या। द्वितीया तु विशेषतः इति कोर्थः। कदाचिदप्रथमा उपादीयते। उदाहर
णं। ओदनं विपच्य गच्छति देवदत्तः। तुमुन् यथा। ओदनं भोक्तुं गच्छति देवदत्तः। यथा पुनरेतद् पुष्पाणि
 तस्मिन्[...] वर्तमान
पुरुषः। प्र[...]पर्यायः पूर्वकालेऽभ्युते। शत्रुगणशोकस्य स्वकालपर्यायो।
वर्तमानेति पे ग्रि०० २५

२७ कालेशानशॆ नशो भवतः। अानशप्रत्ययस्तुनिघ्नपि भवति। कर्तरिकर्मणि भावेचवर्तते। तत्तु निर्देशेवर्तते।
शानशानचौ। शतृशानचौ तावत्। कटं कुर्वन्देवदत्तः ओदनं पचति। अानस्य यथा। श्लोकं पठमानो देवदत्तः
स्तुष्यति। कर्मणिपुनः पच्यमान ओदनो देवदत्तेन शोभते। श्लोकः क्रीयमाणो देवदत्तेन शोभते। ल
क्षणहेत्वोः शतृशानशौ भवतः। किं शतृशानशोर्भ्यां समासः सिध्यति इत्यत आह। द्रव्यसत्वपर
ध्य त्वाभ्यां समासो न तु सिध्यते। कोर्थः उत्तरपदस्थितेन शतृ प्रत्ययेन समासो न भवति इति कथम
चगम्यते। द्रव्यत्वापरत्वात्। द्रव्यसत्वापरत्वाभ्यां समासो न भवति। कटं कुर्वन्पच्यमानः शेषः॥ स्तुति
म ग्रंथानां भावेनाहमतः। कानां पंचविंशतिः॥ परमार्थभावेनिर्वोढं प्रभवेयं भवभवे। अयमर्थः अाल्पेन
शास्त्राभि निलाषपूर्णा मत्यपविलासितचेतसा। महानिरितितत्प्रदर्शनार्थमित्यर्थः॥ इति श्रीवररुचि
विरचिते तृतीयपटलः समासः॥ समाप्तोयं ग्रंथः॥ शुभं भवतु॥ ॥श्रीसांबार्पणमस्तु॥
वररुचिप्रयोगसंग्रह इत्यादिः २